श्री

॥ चतुर्भाणी ॥

"वररुचिरीश्वरदत्तः श्यामिलकः शूद्रकश्च चत्वारः ।
एते भाणान् बभणुः का शक्तिः कालिदासस्य ॥"

कस्यचित्.

एषा
श्रीशिवपुर्यां मङ्गलोदयमुद्राक्षरशालायां
मुद्रापिता प्रकटीकृता च ।
1922.

PUBLISHERS :

D. G. SARMA & KṚISHNA,

BAKERGANJ, PATNA.

INTRODUCTION.

"वररुचिरीश्वरदत्तः श्यामिळकः शूद्रकश्च चत्वारः ।
एते भाणान् बभणुः का शक्तिः कालिदासस्य" ॥

The foregoing verse which singularly strings together four great poets, Vararuci, Iswaradatta, Syamilaka and Sudraka, who undoubtedly belong to different parts of India and to different periods of literary history, is found at the end of the Padmaprabhrtaka. More singularly does it contrast the genius of these revered Four to that of Kalidasa whom eternal Fame has marked as her own. Whatever may be their merits in the art of histrionics or in the exhibition of social pictures of an age which history cannot repaint, the modern research demands enumeration of references to build up a harmonious history of them. The following are the only scraps of stray notices of these poets that a patient search has rewarded us and which do not after all mark the specific points of their life in the Eternity of Time with any certainty.

Of these four authors Vararuci stands first in chronological order. According to Kathasaritsagara he was a contemporary and co-pupil of Panini, who is assigned to the last of the Nandas, the rulers of Magadha. While still young he lost his father and Vyadi first introduced him to his precepter Upavarsa. In corroboration of this statement, the Avantisundari-Kathasara recites his story similarly locating his birthplace some-

where on the bank of the Godavari. His mother was Satrayani, the daughter of Katyayana. Among his works other than those on grammar, astrology and Dharmasastra, a Kavya called Kanthabharana, mentioned by Rajasekhara, and Carumati ascribed to him in the manuscript copies of Subhasitavali are among his lost works. The verse 1740 of the printed text of Subhasitavali is ascribed in our manuscript to Carumati and Bhojadeva in his Srngaraprakasa quotes from the same the following verse as uttered before the hero by a pair of Kinnaras sent on amorous embassy.

कनककुण्डलमण्डितगण्डभा जघनदेशनिवेशितवीणया ।
अमरराजपुरो वरकन्यया तव यशो विमलं परिगीयते ॥

SUDRAKA.

Sudraka comes next in point of chronology. We know him as an author of Mrcchakatika and Vatsarajacarita. But we ascribe Balacarita and Avimaraka to him. The Drama Carudatta is only the first draft of Mrcchakatika. He was a brahmin attached to the court of Svati, an Andhra-Bhrtya king of Ujjain. When still young he quarrelled with the prince and his friends. His intimate friend Bandhudatta saved him from difficulties which he repaid afterwards. A Bhiksu called Sanghilaka, who is a character in this Bhana, was induced to murder him, whom Sudraka overpowered and killed. Dandin describes his adventures in his Avantisundari, which bear striking similarity to the exploits of the heroes of his dramas. A closar examination of the language used in his own characterization of his heroes such as Visamasila, Sahasalanchana etc, induces

one to identify him with the originator of the Vikrama Era. We know that he defeated Svati and obtained the throne of Ujjain. His adventures were sung in a number of literary compositions :—

1. Sudraka-Katha of Ramila and Somila, his own contemporaries, and apparently when the former left it half the latter completed it.

2. Vikranta-Sudraka, a drama by an unknown author exhibiting his political schemes. In one of the acts Haragana burns his wife, Harimati, to save his master, Sudraka, who seems to have rescued her.

3. Sudrakacarita by Pancasikha. A Prakrit verse from it is quoted by Bhojadeva.

Muladeva, the hero of this Drama, appears to be a poet and a scholar. The fragmentary verse of Dandin's Avantisundari runs as follows :—

स नारायणदत्ताया देवदत्ताश्रया कथा । मूलदेवोदिता....

Devadatta, the heroine of this drama, her sister Vipula and his friend Sasa, the characters in this drama, are alluded to by Bana in his Kadambari : —

कर्णीसुतकथेव सन्निहितविपुलाचला शशोपगता च

Acala here means his capital Acalapura, modern Ellichpur. The commentator of Kadambari, commented on the word Karnisuta as the author of Aphorisms on theft. The same fact is referred to by Mahendravarman in his farce, Mattavilasa, and in Mrcchakatika also. Sudraka's name is mentioned by Bana, second Subandhu, Dandin, Vamana and Ksemendra (who spells Sasi instead of Sasa as used by Sudraka). A host of Indian

rulers, especially of the Pallava and the West-Ganga families bore titles consisting the word *Sudraka* as a symbol of valour.

Kamadatta, a work alluded to in this Bhana, must have been a *Prakarana* in 10 acts and probably the production of Sudraka himself. He ridicules Dattaka having used the sacred word *Om* at the beginning of his unvedic Sutras guiding the prostitute's life. Dattakalasi, a follower of Panini's system is introduced to us fighting against the vigorous Katantrikas. This illustrates the the Period of controversy when Panini's grammar acutely struggled against other systems for superiority.

One verse from the Padma Prabhrtaka is quoted by Hemacandra in his Kavyanusasana (page 198—line 12); a few others by Nilakantha in his Kavyollasa and the first verse in the Manuscript copies of Subhasitavali among the verses devoted to Siva.

The first verse of Ubhayabhisarika is found quoted in Tarunavacaspati's commentary on Dandin's Kavyadarsa (page 196 edition of late Professor M. Rangacharya). Two more verses are quoted by Nilakantha in his Kavyollasa.

ISVARADATTA.

Isvaradatta was probably a native of Magadha. His date cannot be determined with the available facts. His work is mentioned by Bhojadeva in his Srngaraprakasa and the same verse was borrowed by Hemachandra (*Vide* Kavyanusasana page 339—18). A number of verses from this work are quoted in Kavyollasa and the

third verse of our text is found in the manuscript copy of Subhasitavali under the name of Isvarasena. This creates a doubt whether he belongs to the family of Pravarasena and Sarvasena. Dhurtavita is a development on certain remarks of Bharata in his Natya Sastra (Vide Chapter 22). There is strong resemblance in expression between Dandin's Avantisundari and Dhurtavita though that in the latter appears more refined.

SYAMILAKA.

Syamilaka appears to have been a native of Kashmir as he calls himsef an *Udicya* (a northerner). As far as we know there are two authors under this name, one a friend of Bhanabhatta and the other, the teacher of Mahimabhatta, who calls him a *Mahakavi*. Mahima, the author of Vyaktiviveka, appears to be an elder contemporary of Sriharsa, the Khandanakara. Syamilaka, our author is mentioned by Ksemendra in his Aucityavicara and the verse quoted is found in our text. Abhinavagupta of 1000 A. D. also mentions Syamilaka and quotes from Padataditaka, so, it seems improbable that he is the same as the teacher of Mahimabhatta, whose date is still uncertain. Undoubtedly he was a native of Kashmir but whether he was a contemporary of Bhattanayaka, Abhinavagupta or still later has to be proved. Syamilaka of our text seems to have lived about 800—900 A. D. Verses from Padataditaka are found quoted in Maduscript copies of Subhasitavali, Kavyollasa, Hrdayaharini (A commentary on Bhoja's Astadhyayi), besides in Abhinavabharati, Aucityavicara and Vakroktijivita of Kuntalaka.

Both Isvaradatta and Syamila quote each one

Sutra from Dattaka's Vaisika sutras, but they nowhere mention Vatsyayana.

We are deeply indebted to M. R. Ry. Narayana Nambudripad of Trichur who permitted us use his Mss on condition that these Bhanas should be published very soon.

MADRAS,

M. Ramakrishna Kavi,
S. K. Ramanatha Sastri.

पाठभेदसूची ॥

* एतच्चिह्नं मुद्रणस्खालित्यं सूचयति ॥

पद्मप्राभृतके—

पृष्ठम्	पंक्तिः			
२	१७		फुल्लवल्लीवनं	फुल्लवल्लीपिनद्धं वनं
१०	९	*	मुन्मुकेन	मुल्मुकेन
१४	१४	*	साधुः	साधु
१५	२	*	संखिलको	संघिलको
१६	४	*	एष	एषा
१६	११	*	आपि च	अपि च
१६	२३	*	सुहृत्गृहे	सुहृद्गृहे

उभयाभिसारिकायाम्—

१	१८		परवारुणी	वरवारुणी
१	१९		विगुणित	विरचित
२	२१		शीलं	लीलं
३	४		व्याहरन्तीव	व्याहरन्तीव दशमुखवदनानीव
३	११		वदनैः	मदनैः
३	१६		चतुरपद	चतुरमृदुपद
३	१९		चित्रितोष्ठं	चिह्नितोष्ठं
४	९		मामैवं	सुन्दरि मामैवं
५	३	*	पूर्ण	चूर्ण

पृष्ठम्	पंक्तिः			
५	२२	*	दिवसकस्य	दिवसकरस्य
६	५		तत्वतस्त्वा	तत्वतः श्रुतिं
८	२३	*	क्रमिष्यमः	क्रमिष्यामः
९	४		निर्जिताः	निर्मिताः
९	९		राजावस्थानं	राजोपस्थानं
९	२५	*	त्वमेवं	ह्येवं तां
१०	६		मोचितः	मोचितः अहमप्यसत्कार्यमनुष्ठास्यामि
१०	१२	*	दशान्तरं	देशान्तरं
११	७		स्वभावता च	स्वभावता वेश्याङ्गनानाम् । एहि भोः
१२	१		सारिण	कारिण
१२	३		अयमह	अयमय
१२	६		....सविमृ	तदतिरतिरभसविमृ
१२	६	*	मुपेहि	मुपैहि
१३	२४	*	इर्ष्या	ईर्ष्या
१५	३	*	अत्म	आत्म

धूर्तविटे—

२	५	कामयतीव	कारयतीव
३	१	निवृत्त...	निवृत्तसङ्गीतमृदङ्गसन्निभाः प्रशान्तनादा विगता घनाश्च । प्रासादमारुह्य वितत्य पक्षौ- विरौत्ययं गेहशिखी प्रहृष्टः ॥
५	६	समुपचित	समुपहित
५	२१	मतिलंघितं	मतिलालितं

पृष्ठम्	पंक्तिः			
६	३		कोपाश्वितं	कोपान्वितं
७	३		मीक्षणं निमील्य	मक्षणं निशम्य
७	१३		तटोपमर्द्य	तटावनम्य
७	२२		मधुर	मधुरचारु
८	७	※	स्ततटैः	स्तनतटैः
८	९		ताळान्वितैः	कालान्वितैः
१३	१८	※	इतो	इति
१५	१६		नैव वा ॥	नैव वा ॥

अपि च—

राजनि विद्वन्मध्ये वरयुवतिनाञ्च सङ्गमे प्रथमे ।
साध्वसदूषितहृदयः पटुरपिवागातुरो भवति ॥

(परिक्रम्य)

१६	१२		कामुकाः	कौमारकाः
१६	१६	※	पादग्रहणे...	कामः— इयमार्या ननु गर्वं
१६	२२		कारिणः केचित्	कारिणी भवति
१८	१२		तदन्य	वदन्य
१८	१५		निपुणे	निपुणा
१९	१		व्याज	वास
२१	२१		बाह्या	पार्श्वा
१२	२४	※	स्तनतटक	स्तनकतट
२१	२५		मननुमेयं	मननुनेयं
२२	८	※	वधूष्ववोप	वधूष्वेवोप
२२	१०	※	श्चैतदल्प	श्चैतदल्प
२३	८		चोरित	चोदित

पृष्ठम्	पंक्तिः		
२३	२१	गुणज्ञा	कृतज्ञा
२३	२३	* कतकं	कृतको
२५	१२	* सरसं	स रसं
२९	१५	* कुहकं	कनकं
२९	१८	सजाति	स्वजाति

पादताडितके—

२	८	कौरुकुर्चा	कौरुरुर्चा
३	१२	* शने	शनै
२५	६	* प्रमार्ष्ट्रि	प्रमार्ष्ट्रि
२५	६	* प्रमार्ष्टुम्	प्रमार्ष्टुम्
२५	२०	* त्वध्यपियन्	त्वय्यपियदि
२८	६	* करभोगै	करभोगौ

॥ श्रीरस्तु ॥

श्रीशूद्रकविरचितं

पद्मप्राभृतकम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू— जयति भगवान् स रुद्रः
कोपादथवाप्यनुग्रहाद्येन ।
स्त्रीणां विलासमूर्तिः
कान्ततरवपुः कृतः कामः ॥

अपि च—

पुष्पसमुज्ज्वलाः कुरवका नदति परभृतः
कान्तमशोकपुष्पसहितं चलति किसलयम् ।
चूतसुगन्धयश्च पवना भ्रमररुतवहाः
सम्प्रति काननेषु सधनुर्विचरति मदनः ॥

किञ्चान्यत्—

आतोद्यं पक्षिसंघास्तरुरसमुदिताः कोकिला गान्ति गीतं
वाताचार्योपदेशादभिनयति लता काननान्तःपुरस्त्री ।
तां वृक्षाः साधयन्ति स्वकुसुमहर्षिताः पल्लवाग्राङ्गुलीभिः
श्रीमान्यासो वसन्तस्त्वरितमपगतो हारगौरस्तुषारः ॥

मूलादपि मध्यादपि
विटपादप्यङ्कुरादशोकस्य ।
पिशुनस्यापिव रहस्यं
समन्ततो निष्कसति पुष्पम् ॥

अहो अयं—

ससंभ्रमपरभृतरुतः
ससिन्धुवारः सकुन्दसहकारः ।
समदमदनः सपवनः
सयौवनजनप्रियः कालः ॥

(निष्क्रान्त;)

स्थापना

(ततः प्रविशति विटः)

वि— साधु भोः! रमणीयं खलु तावदिदं शिशिरजराजर्जरस्य संवत्सरविटस्य हिमरसायनोपयोगात्पुनरावृत्तं वसन्तकैशोरकमुपोह्यते । संप्रति हि—

प्रचलकिसलयाग्रप्रनृत्तद्रुमं
यौवनस्थायते पुल्लवल्लीवनं
तिलकशिरसि केशपाशायते कोकिलः
कुन्दपुष्पे स्थितः स्त्रीकटाक्षायते षट्पदः
काचिदचिरविरूढबालस्तनी कन्यकेवोन्नतैः
श्यामलैः कुड्मलैः पद्मिनी शोभते
परयुवतिरतिश्रमस्विन्नपीनस्तनस्पर्श-
धूर्तायिता वान्ति वासन्तिका वायवः ।

इत्थं च मदनशरसन्तापकर्कशो बलवानयमृतुः यदेवदत्तासुरतसुप्रतितिरोहितयौवनोत्सवस्य कर्णीपुत्रस्योन्मुच्यमानबालभावयौवनावतारकोमलां मदनमञ्जरिकां देवसेनाचूतयष्टिमतिलंघयते मदनभ्रमरः। अथवा किमिव कर्णीपुत्रस्यातिक्रमिष्यति। समधुसर्पिष्कं हि परमन्नं सोपदंशमास्वाद्यतरं भवति, अतः शङ्के देवदत्तासुरतमधुपानोपदंशभूतं चण्डालिकाश्रयं बालभावानिरुपस्कृतोपचारहसितललितरमणीयं दारिकासुन्दरीरतिरसान्तरमपि प्रार्थयत इति ॥

अहो नु खल्वयं लघुरूपोऽपि बलवान् मदनव्याधिः, येनानेकशास्त्राधिगतानिष्पन्दबुद्धिः सर्वकलाज्ञानविचक्षणो व्युत्पन्नयुवतिकामतन्त्रसूत्रधारः कर्णीपुत्रोऽपिनामैतामवस्थामुपनीतः। स हि—

उन्निद्राधिकतान्तताम्रनयनः प्रत्यूषचन्द्राननो
ध्यानश्यानतनुर्विजृंभणपरः सन्तप्तसर्वेन्द्रियः।
रम्यैश्चन्द्रवसन्तमाल्यरचनागान्धर्वगन्धादिभिः
यैरेव प्रमुखागतैः सरमते तैरेव सन्तप्यते ॥

अथवा देवसेनामुद्दिश्येति नैतदाश्चर्यम्। कुतः श्रावयमन्मथमनोरथक्षेत्रं हि सा दारिका। अर्हत्यस्या रूपयौवनलावण्यं कर्णीपुत्रस्योन्मादं जनयितुम्। तस्या हि—

विभ्रान्तेक्षणपक्ष्मताम्रुरुचकं प्राचीनगण्डं मुखं
प्रत्यग्रोत्पतितस्तनाङ्कुरमुरो बाहू लताकोमलौ।
अव्यक्तोत्थितरोमरेखमुदरं श्रोणी कुतोऽप्यागता
भावश्चानिभृतस्वभावमधुरः कं नाम नोन्मादयेत्? ॥

(परिक्रम्य)

स इदानीं देवसेनासमुत्थं मदनामयमतिव्यायामकृतज्वरमुद्दिश्य हारतालवृन्तचन्दनोपनीयमानदाहप्रतीकारः तत्समागमाशाकृतप्राणधारणः शयनपरायणः कथंचिद्वर्तते। अद्य तु प्रागह्रेव पुष्पाञ्जलिको नाम देवदत्तायाः परिचारकः सोपचारमुपगम्य कर्णीपुत्रमुक्तवान—

"आर्यपुत्र विज्ञापयत्यज्जुका देवदत्ता 'न खलु मे ह्यस्तनेऽहन्यनागमनात् बहुमानमध्यस्थतामुपगन्तुमर्हत्यार्यपुत्रः। इयं हि मे भागिनिका चण्डालिका किमप्यस्वस्थरूपा तदनुकम्पया पर्युषितास्मि, इयन्तु साम्प्रतमागच्छामि," इति। ततस्तदुक्तदत्तप्रतिवचनः प्रतिप्रस्थाप्य पुष्पाञ्जलिकं कर्णीपुत्रः सोपग्रहमिव मामुक्तवान् "सखे शश त्वयापि नाम श्रुतं 'साम्प्रतमिहागच्छामि' इति। तदेष इदानीमवसरः सुखप्रश्नागमनेन विविक्तविस्रंभां देवसेनामवगाह्य सन्तापकारणमस्याः परिज्ञातुम्। तदेषोऽञ्जलिः। सर्वोपायैरर्हति देवानांप्रियोऽस्माकं देवसेनासमुत्थं हृदयगतमापुंखनिखातं मदनशरशल्यं समुद्धर्तुम्" इति। ततः सस्मितानुयात्रमुक्तो मया "भवतु धूर्ताचार्य किमिति त्वया दिवादीपप्रज्वालनं क्रियते। किं नाभिज्ञोऽहं युवयोरन्योन्यमनोरथमूकदूतकानां नयनसङ्केतकानाम्। अपि च, स एवास्मि मूलदेवसखः शशोऽहं नैनामप्रतार्य गमिष्यामि" इत्युक्त्वा प्रस्थितोऽस्मि। तत् किं नु राजमार्गे सुहृत्प्रश्नलङ्घाभिः कालं क्षपयता तथा गन्तव्यं यथा देवदत्ताविरहितां चण्डालिकामासादयेयम्।

(परिक्रम्य)

अहो नु खलु वसुन्धरावधूजम्बूद्वीपवदनकपोलपत्रलेखाया नानाभाण्डसमृद्धाया अवन्तिसुन्दर्या उज्जयिन्याः परा श्रीः। इह हि—

पुण्याहस्तावद्वेदाभ्यासा
द्विरदरथतुरगनिनदा धनुर्गुणनिःस्वना

दृश्यं श्राव्यं विद्वद्वादा-
श्चतुरुदधिसमुदयफलैः कृता विपणिक्रिया ।
गीतं वाद्यं द्यूतं हास्यं
क्वचिदपि च विटजनकथाः क्वचित्सकलाः कलाः
क्रीडापक्षिक्षुब्धाश्चेमाः
प्रचुरकरवलयरशनास्वना गृहपङ्क्तयः ॥

(परिक्रम्य) अपीदानीमभिमतकार्यनिष्पत्तिसूचकं किञ्चिन्निमित्तं पश्येयम्! (विलोक्य) अयं तावत्काव्यव्यसनी कात्यायनगोत्रः शारद्वतपुत्रः सारस्वतभद्रः स्वगृहद्वारकोष्ठके श्वेतवर्णव्यग्राग्रहस्तः चिन्तितोपस्थितास्वादिताकाराक्षिभ्रूविकारैरभिनयन्निव चक्रपीडकक्रीडामनुभवति । तत्काममस्मिन्काले अश्रुतप्रातिभास्रोतोविघातिनं सुप्रियमपि सुहृदमभ्यसूयन्ते कवयः । किन्तु सरस्वतीलताप्रभग्नानां वाक्पुष्पकाणां कर्णपूरमकृत्वातिक्रमितुं वञ्चितमिवात्मानं मन्ये । यावदेनमुपसर्पामि । (उपेत्य)

सखे कात्यायन किमिदमाकाशरोमन्थनं क्रियते! किं ब्रवीषि— "स एव मां काव्यपिशाचो वाहयति" इति । मा तावत् भोः अंधो पुराणकाव्यपदच्छेदग्रथनचर्मकार किमिदं नष्टगोयूथ इव गोपालको नवपदान्यन्वेषसे । अथ सखे किं वस्तु परिगृह्य कृतः श्लोकः । किं ब्रवीषि— "ननु खलु इममेव वर्तमानरमणीयं वसन्तसमयमाश्रित्य कृतः श्लोकः" इति । अथ शक्यं श्रोतुम्? किं ब्रवीषि— "नन्वेष भित्तिगतो वाच्यताम्" इति । क्वासौ? (विलोक्य) अये अयं —

पुष्पस्पष्टाट्टहासः समदमधुकरः कोकिलावावदूकः
श्रीमत्स्वेदावतारः प्रसुभगपवनः कर्कशोद्दामकामः ।

बालामप्यप्रगल्भां वरतनुमवशां कामिने संप्रदातुं
कालोऽयं तत्करिष्यत्यनुनयनिपुणं यत्र दूतीसहस्रम् ॥

साधु भोः कल्याणं खल्वेतन्निमित्तम् । वयस्य सत्पुत्रलाभ इव यशस्करः श्लोकोऽयमस्तु । वाक्पुरोभागानामभागी भव । अये केनैतद्व्यस्मितम् ! (विलोक्य) अये दर्दरकः पीठमर्दोऽप्यत्र । अघो ! दर्दरक किमत्र हास्यस्थानम् ? किं ब्रवीषि — "इदं खलु भवता समुद्राभ्युक्षणं क्रियते यद्वागीश्वरं वाग्भिरर्चयसि" इति । मा तावदलोकज्ञ किं वसन्तमासो न पुष्पोपहारमर्हति? अपि च न त्वया श्रुतपूर्वं—

सूर्यं यजन्ति दीपैः समुद्रमद्भिर्वसन्तमपि पुष्पैः ।
अर्चामो भगवन्तं वयमपि वागीश्वरं वाग्भिः ॥ इति ॥

भवतु । दर्शितस्ते पीठमर्दस्वभावः । सेवितोऽत्रभवान् । अपि च वसन्तकालोऽयमच्छलः परभृतप्रलापानाम् । ईदृश एवास्तु भवान् । साधयाम्यहम् । (परिक्रम्य विलोक्य)

अये अयमपरो विपुलामात्यः कामदत्ताप्राकृतकाव्यप्रतिष्ठानभूतः वैशिकशास्त्रयोमुख्यः प्रस्थितः । आ गृहीतम्— एष देवदत्तासौभाग्यसंक्रान्ते मूलदेवे विपुलावमानादात्मानमवधीरितमवगच्छन् प्रणयकुद्धःखल्वेष धान्त्रः । भवतु, परिहासप्लवेनैनमवगाहिष्ये । (निर्दिश्य)

भोः सुहृत्कुमुदान्यनवबोधयन् दिवाचन्द्रलीलयातिक्रामसि । पृच्छामस्तावत्किञ्चित् ।

कलाविज्ञानसम्पन्ना गर्वैकव्रतशालिनी ।
न खल्वत्यन्तधीरा सा खिन्ना ते विपुलामतिः ।

किं ब्रवीषि— "गृहीतो वञ्चितकस्यार्थः । किं तवाचार्यो मूलदेवो न ज्ञायत" इति । मामैवम् । देवदत्तासुरतसंक्रान्तस्यापि विपुलागतमेव हृदयम् । किं ब्रवीषि— "तदपि मूलदेवीयं शाठ्यम्" इति । आम । भवान् खलु सत्यार्जवः किमिदानीं स्वशिष्यां विपुलां नोपालभते, यया प्रणयकोपानुनयार्थमभिगतः कर्णीपुत्रः—

प्राप्त इव शरत्कालः प्रावृट्कलुषां नदीं प्रसादयितुम् ।
क्षिप्तः कदर्थयित्वा हेमन्ते तालवृन्त इव ॥

किं ब्रवीषि —"कदा कथम्" इति । सखे श्रूयताम् ।

ननु कतिपयाहमिवाद्य मद्द्वितीयः कर्णीपुत्रो विपुलामनुनेतुमभिगतः । अथ द्वारकोष्ठकस्थेनानेन क्रोधागाधपरीक्षार्थमहमादितः सोपग्रहं कल्पितः । सोऽहं प्रियवचनोपन्यासेनाभिगतश्चैनाम् । सापि चेर्ष्यादोषदूषितलावण्या दृष्ट्वैव मां "कुतोऽयमायास" इत्युक्त्वा पराङ्मुखी संवृत्ता । ततः सपरिहासमुक्ता मया—

किमुक्ता केन त्वं प्रतिवच इदं कस्य वचसः
तदावृत्ता भूत्वा वद वदनचन्द्रेण वनिते ।
प्रसन्नां त्वां दृष्ट्वा भवति हि मम प्रीतिरतुला
भुजङ्गीव क्रुद्धा भ्रुकुटिरियमुद्वेजयति माम् ॥ इति ।

तदनन्तरं अवन्तिसुन्दर्या सख्याभिहिता —

किं कृत्वा भ्रुकुटीतरङ्गविषमं रोषोपरक्तं मुखं
निश्वासज्वरिताधरं प्रियसखं प्राप्तं न संभाषसे ।
सौभाग्येन हि शत्रुकर्म कुरुषे स्त्रीगर्वमेधाविनि
मानं मानिनि मुञ्च सर्वमचिरादत्यायतं छिद्यते ॥ इति ।

अथ गुणवती परिषदिति कृत्वा कर्णीपुत्रोऽप्यभिगतः । सवीनया प्रणिपातावनतः सरोषमवधूयाभिहितः—

"कृत्वा विग्रहमागतोऽसि नियतं निर्वासितो वा तया
कान्तालापविनोदने किल वयं विश्रामभूमिस्तव ।
किं नैराश्यनिरुत्सुकस्य मनसः संधुक्षणैर्मे पुनः
पीतेनात्र किमौषधेन कटुना सुस्वागतं गम्यताम्"॥ इति ॥

किं ब्रवीषि— "यद्येवं तामेवाविनीतां तावदेनामुपालब्धुं गच्छामि" इति । छन्दतः । तया गृहीतवाक्यो भवानस्तु । साधयामस्तावत् । (परिक्रम्य) हा धिक् अपरं मूर्तिमत् गमनविघ्नमुपस्थितम् ॥

एष हि पाणिनिपूर्वको दन्दशूकपुत्रो दत्तकलशिर्नाम वैयाकरणः प्रतिमुखमेवोपस्थितोऽस्मान् । अपीदानीमविघ्नेनास्य वाग्वागुरामुत्तरेयम् । संरब्धमिवैनं पश्यामि । आम् वादविघट्टितेनानेन भवितव्यम् । तथाहि— अस्य कलहकण्डूबन्धुरा वागीषदपि स्पृष्टा देवकुलघण्टेवानुस्वनाति । प्रियगणिकश्चैष धान्त्रः । तां किल नूपुरसेनाया दुहितरं रशनावतिकां नाम व्यपदिशति । भोः कष्टम् । करभकण्ठावसक्तां वल्लकीमिव शोचामि तां तपस्विनीं रशनावतिकाम् । एष उद्यम्याग्रहस्तमभिभाषत एवास्मान् ।

किमाह भवान्— "अपि सुखमशयिष्ठाः" इति । का गतिः, भवतु, सभाजयिष्याम्येनम् । स्वागतमक्षरकोष्ठागाराय । वयस्य दत्तकलशे संरब्धमिव त्वां पश्यामि । कच्चित् कुशलम् । किं भवानाह— "एषोऽस्मि बलिभुग्भिरिव संघातबलिभिः कातन्त्रिकैरवस्कन्दितः" इति । हन्त! प्रवृत्तं काकोलूकम् । सखे दिष्ट्या त्वामक्षतपक्षं पश्यामि । किं ब्रवीषि— "कोऽचेदानीं मम वैयाकरणपारशवेषु कातन्त्रिकेष्ववसरः" इति । यथातथास्तु भवतः । साधयाम्यहम् ।

किं ब्रवीषि— "क सखिश्चर्यार्थः, तिष्ठतावत्, किमसिदुर्द्रष्टुः" इति । हाधिक्, प्रसीदतु भवान् । नार्हस्यस्मान् एवंविधैः काष्ठप्रहारनिष्ठुरैर्वागशनिभिरभिहन्तुम् । साधु व्यावहारिकया वाचा वद । अभाजनं हि वयमीदृशानां कर्णोद्गारदुर्भगानां श्रोत्रविषनिषेकभूतानां वैयाकरणवाग्व्यसनानाम् । किं ब्रवीषि— "कथमहमिदानीमनेकवावदूकवादि वृषभविघट्टनोपार्जितामनेकधातुशतघ्निं वाचमुत्सृज्य स्त्रीशरीरामिव माधुर्यकोमलां करिष्यामि" इति अहो अनाथः खल्वसि । कुतः—

स्वैरालापे स्त्रीवयस्योपचारे
कार्यारम्भे लोकवादाश्रये च ।
कः संश्लेषः कष्टशब्दाक्षराणां
पुष्पापीडे कण्टकानां यथैव ॥

किमाह भवान्— "स्थाने खलु सा पुंश्चली शब्दशिफरमाभाषिता रुष्टा" इति । तत् केयं पुंश्चलीति? किं ब्रवीषि— "प्रिया नाम केनोच्यते" इति । (विमृश्य) आ विदितम् । रशनावतिका एतदर्हति । नातश्च भूयः कष्टतरं— यत्सा प्रचुरचूतपादपान्तरचारिणीव कोकिला स्वभावखरं विल्वपादपमाश्रिता । कष्टं भोः महदिदं परिहासवस्तु, आस्वादयिष्याम स्तावत् ।

वयस्य दत्तकलशे एवं स्वभावदक्षिणस्य भवतः कथं कामिनीविरक्तेति परं मे कुतूहलं श्रोतुम् । एतदुच्यतां तावद्विस्तरतः । किमाह भवान्— "साधु सा पुंश्चली पूर्वेद्युः पर्वकाले वेशकोष्ठकमुपेत्य रिरंसया मां हविर्जुहूषन्तं जिघृक्षतीवोपासीदत् । ततोऽहमेनामवोचम्— वृषलि मा हविर्जुहूषन्तं मा मा स्प्राक्षीः" इति । हन्त!

इदं तत् दुष्टगान्धर्वं नाम । सुकुमारः खलु कामिनीसंपरिग्रहः । कलहोऽयमुपचारो नु । मा तावद्लोकज्ञ युक्तं नाम त्वया प्रणयोपगतां कामिनीं विरागयितुम् । स्त्रीजनोऽपि त्वया कष्टशब्दनिष्ठुराभिर्व्याकरणविस्फुलिङ्गाभिर्वाग्भिरुत्त्रासयितव्यो भवति । इदमपि न त्वया श्रुतपूर्वम्—

"रत्यर्थिनीं रहसि यः सुकुमारचित्तां
कान्तां स्वभावमधुराक्षरलालनीयाम् ।
वागर्चिषास्पृशति कर्णविरेचनेन
रक्तां स वादयति वल्लकिमुन्मुकेन" इति ॥

सर्वथा दुष्करकारिणी खलु रशनावतिका, या भक्तमनेन कल्पयति । अथवा तु तस्याश्शापः । वयस्य दत्तकलशे श्रुतं श्रोत्ररसायनम् । स्वस्ति भवते । साधयाम्यहम् । (परिक्रम्य)

इदमपरं मनुष्यकान्तारमुपस्थितम् । एष हि धर्मासनिकपुत्त्रः पवित्रको नाम प्रच्छन्नपुंश्चलीको (आचौक्षः चौक्षवारितः) राजमार्गेऽविदितजनसंस्पर्शं परिहरन्निव संगृहीतार्द्रवसनः सङ्कुचितसर्वाङ्गो नासिकाद्वयमङ्गुलीद्वयेन पिधाय चत्वरशिवपीठिकामाश्रित्य स्थितः । हास्यः खल्वेष तपस्वी । यथा तावदयं मत्तकाशिन्या दुहितरं वारुणिकां नाम बन्धकीमनुरक्त इति श्रूयते । तदिदानीं किमयमाकुलो भवति । इदमस्याविनयप्रचारपुस्तकभाण्डमुद्घाट्यते ।

अंघो पवित्रक किमिदमुष्णस्थलीकूर्मलीलया स्थीयते । किं ब्रवीषि— "राजमार्गे सुलभमविदितजनसंस्पर्शं परिहरामि" इति ।

अंघो अविज्ञातजनसंस्पर्शो नाम परिह्रियते भवता । वारुणीजघनपात्रं जाह्नवीतीर्थमिव परमपवित्रं ननु ।

किं ब्रवीषि–"नैतदस्ति" इति । किमिदं गोपालकुले तक्रविक्रयः क्रियते । कितवेष्वपि नाम कैतवमारभ्यते । किं ब्रवीषि— "साधुमर्षयतु भवान् निपुणः खलु ते चारः" इति । कस्य चारः? कुतश्चारः? न सूर्यो दीपेनान्धकारं प्रविशति, न हि मे चारकृत्यमस्ति । सहस्रचक्षुषो हि वयमीदृशेषु प्रयोजनेषु । तदपनयशठप्रचारकञ्चुकम् । आकृतिमात्र भद्रको भवान् मिथ्याचारविनीतोह्यसि । अंघो सज्जनसब्रह्मचारिन् विटपारशवचौक्षपिशाचो वेश्याप्रसङ्गश्चेति आचारविरुद्धमेतत् विरुद्धाशनमिव मां प्रति भाति । अपिच, चौक्षोपचारयन्त्रितः तामुपगृह्णन् सन्दंशेन नवमालिकामपचिनोषि । किं ब्रवीषि— "सर्वथा निवृत्तोऽस्मि विभ्रमात्" इति । पायसोपवासमिव क एतत् श्रद्धास्यति । किं ब्रवीषि— "यद्येवं सुप्रसन्नोऽसि शिष्यत्वे निष्पादयतु मा भावान्" इति । दिष्ट्या भवान् सत्पथमारूढः । यदि च विटत्वे कृतो निश्चयः शीघ्रमेव वेशयुवतिप्रणयपरिघभूतमिथ्याचारकञ्चुकमुद्घाट्यताम् । घुष्यतां विटशब्दः । किमाह भवान्— "प्रणतोऽस्मि" इति । हन्तेदानीं दत्तः प्रदेयकः स्वैरमयन्त्रितश्चाचारः । अयमिदानीमाशीर्वादः—

आक्षिप्तस्रस्तवस्त्रां प्रशिथिलरशनां मुक्तनीवीं विहस्तां
हस्तव्यत्यासगुप्तस्तनविवरवलीमध्यनाभिप्रदेशाम् ।
लज्जाधीनोपविष्टां नहि नहि विसृजेत्येवमाक्रन्दमानां
शय्यामारोप्यकान्तां सुरतसमदयस्याप्रसस्यं गृहाण ॥

किं ब्रवीषि— "उपस्कारितं श्रेयः, चिकित्सितोऽस्मि" इति । यद्येवमाचार्यदक्षिणेदानीमेष्टव्या ।

किं ब्रवीषि— "नन्वयमञ्जलिः" इति ।

भो नन्वयमातिव्ययः । भवतु । इदानीं निष्पन्नशिष्याः स्मो वयम् । भवानिदानीमाचार्यो न शिष्यः । सगर्वं स्वैरमयन्त्रितश्चर । साधयाम्यहम् । (परिक्रम्य)

ही ही साधु भोः नानाकुसुमसमवायसंपिण्डितेन वसन्तमध्याह्नस्वेदावतारस्पर्शसुभगेन प्रत्युद्गम्य प्रतीहारित इवाहं माल्यापणप्रासादसंबाधविनिःसृतेन विपणिवायुना नूनमुपस्थितोऽस्मि । (पुष्पवीथीं विलोक्य) मूर्तिमतीव नानाकुसुमसमवायाङ्गप्रत्यङ्गा वसन्तवधूः । इयं हि—

पद्मोत्फुल्लश्रीमद्वक्त्रा सितकुसुममुकुलदशना नवोत्पललोचना
रक्ताशोकप्रस्पन्दोष्ठी भ्रमररुतमधुरकथिता वरस्तबकस्तनी ।
पुष्पापीडालङ्काराढ्या ग्रथितशुभकुसुमवसना स्रगुज्ज्वलमेखला
पुष्पन्यस्तं नारीरूपं वहति खलु कुसुमविपणिर्वसन्तकुटुम्बिनी ॥

भोः सर्वथा नानाकुसुमसमवायगन्धहृतहृदयोऽहं दुष्करं खलु करोमि एनामतिक्रामन् । (परिक्रम्य)

इदमपरं परिहासपत्तनमुपस्थितम् । एष हि मृदङ्गवासुलको नाम पुराणनाटकविटः "भावजरद्गवः" इति गणिकाजनोपपादितद्वितीयनामधेयः सुकुमारगायकस्य आर्यनागदत्तस्योदवसितान्निर्गच्छति । सुष्ठु तावदनेन नलिकिमर्दस्नानानुलेपनपरिस्पन्देन जराकौपीनप्रच्छादनमनुष्ठितम् । सर्वसत्त्वश्चैष धान्त्रः । न शक्यमिममनाभिभाष्यातिक्रमितुम् । परिहसिष्याम्येनम् । (निर्दिश्य) भाव जरद्गव

अपि सुभिक्षमनया जरसा । किमाह भवान्— "एष भवतो नि-र्वेदात् जरद्भुजङ्ग इव जरात्वचमुत्सृजामि" इति । प्राणैस्सहेति पश्यामः । पुनर्युवैव भावः । सिद्धं हि ते मायया यौवनकर्म । तव हि—

रागोत्पादितयौवनभ्रातिनिधिच्छन्नव्यलीकं शिरः
सन्दंशापचितोत्तरोष्ठपलितं निर्मुण्डगण्डं मुखम् ।
यत्नेनारचितामृजागुणबलेनानेनचाङ्गस्य ते
लेपेनेव पुराणजर्जरगृहस्यायोजितं यौवनम् ॥

किं ब्रवीषि— "मदनीयं खलु पुराणमधु" इति । मनोरथ एष भावस्य । सर्वथा त्रिफलगोक्षुरलोहचूर्णसमृद्धिरस्तु भवतः । साधयाम्यहम् । (परिक्रम्य)

अये अयमिदानीं सहसोपस्थिते मयि द्यूतसभालिन्दनतः शि-लास्तंभेनात्मानमावृत्य स्थितः । (विलोक्य) भवतु । विज्ञातम् । शैथिलकोऽयम् । किं नु खल्वस्यास्मद्दर्शनपरिहारेण प्रयोजनम् । किं मालतिकादूतीस्वयंमहाविनय आत्मशङ्कामुत्पादयति । भवतु । प-रिहासप्लवेनैनमवगाहिष्ये ।

भो द्विजकुमारक किमिदमात्मप्रच्छादनेन सुहृत्समागमः छत्-त्रेण चन्द्रातप इव प्रतिषिध्यते । एष निःशब्दप्रहसितः । किं ब्रवीषि — "स्वागतं सुहृत्कर्णधाराय" इति । अत्र कुतो मे सुहृत्कर्ण-धारता योऽयं (हं) त्वस्माद् इन्दुरासिप्रणयसाहसात् बहिष्कृतः । किं ब्रवीषि— "नैतदस्ति" इति । अयि सुरतोच्छवृत्ते मामैवम् । प्र-काशं खल्वेतत् यथा शैथिलकस्य गृहे शाक्यभिक्षुकी प्रतिवसतीति ।

साकिल त्वयि उत्पन्नकामया मालाकारदारिकया मालतिकया त्व-त्सकाशं दौत्येनानुप्रेषिता । तस्याश्च त्वया निरुपस्कृतभद्रकं रूपयौ-वनलावण्यमामिषभूतमुद्दिश्य तदात्वमेवावेक्षितम् । न आयतिकम् । किं ब्रवीषि— "सखे यत्सत्यमनागतसुखाशया प्रत्युपस्थितसुखत्यागो न पुरुषार्थः । न दीपेनाग्निमार्गणं क्रियते" इति । भोः सुष्ठु कृ-तम् । वञ्चितं खलु रहस्यं यदीदं न विस्तरतो ब्रूयाः । विस्तरत इदानीं श्रोतव्यम् । किमाह भवान्— "क इदानीमाविनयप्रपञ्च-मात्मनः प्रकाशयति । किन्तु समासतः श्रूयताम् । तया हि प्र-सभमाक्रान्तयाभिहितोऽहम्—

'संपातेनातिभूमिं प्रतरसि शठ हे मान्याः खलु वयं
दौत्येनाभ्यागतायाः चपल न सदृशं यत्तेऽव्यवसितम् ।
कृच्छ्रादुद्धृतास्मि जाता परगृहवसतिं संप्राप्य विजने
मामेवं हा प्रसीद प्रिय विसृज पुरा कश्चित्प्रविशति ॥ इति'

इति । साधुः भोः अमृदङ्गो नाटकाङ्कस्संवृत्तः । अनेन सुरतस-न्धिच्छेदेन स्थिरीकृतो वासिष्ठिपुत्रेण विटशब्दः । वयस्य सुभगो भव । साधयाम्यहम् । (परिक्रम्य) हन्त! भोः सुरतसर्वातिथिस-न्निवेशं वेशमनुप्राप्ताः । योऽयम्—

कामावेशः कैतवस्योपदेशो
मायाकोशो वञ्चनासन्निवेशः ।
निर्द्रव्याणामप्रसिद्धप्रवेशो
रम्यक्लेशस्सुमवेशोऽस्तु वेशः ॥

(परिक्रम्य) क एष मलिनप्रावारावगुण्ठितशरीरः सङ्कुचित-

सर्वाङ्गो वेश्याङ्गणात् द्रुततरमभिनिष्क्रामति । अये संभ्रमाद् भ्रष्टं काषायान्तमुपलक्षये । आ! स एष धर्मारण्यनिवासी संखिलको नाम दुष्टशाक्यभिक्षुः । अहो! सारिष्टता बुद्धशासनस्य — यदेवंविधैरपि वृथामुण्डैरसद्भिक्षुभिरुपहन्यमानं प्रत्यहमभिपूज्यत एव । अथवा न वायसोच्छिष्टं तीर्थजलमुपहतं भवति । एष तिरस्कृत्यैवात्मानं दृष्ट्वास्मानभिप्रस्थितः । भवतु । मम वाक्शरगोचरोऽक्षतो न यास्यति । अभिभाषिष्ये तावत् ॥ (निर्दिश्य)

विहारवेताल केदानी मुलूक इव दिवाशङ्कितश्चरसि । किं ब्रवीषि —"सांप्रतं विहारादागच्छामि" इति । भूतार्थं जाने विहारशीलतां भदन्तस्य । धात्र केदानीं वेशवीथीदीर्घिकागतो बक इव शङ्कितश्चरसि । ननु सुरतपिण्डपात मनुष्ठीयते ? किं ब्रवीषि—"मातृव्यापत्तिदुःखितां संघदासिकां बुद्धवचनैः पर्यवस्थापयितुमागतोऽस्मि" इति । विनष्टं त्वन्मुखाद् बुद्धवचनं मदभ्रमादिवोपस्पर्शं पश्यामः । भोः कष्टम् —

वेश्याङ्गणं प्रविष्टो मोहाद्भिक्षुर्यदृच्छयावापि ।
न भ्राजते प्रयुक्तो दत्तकसूत्रेष्विवोङ्कारः ॥

किं ब्रवीषि— "मर्षयतु भवान् ननु सर्वसत्त्वेषु प्रसन्नचित्तेन भवितव्यम्" इति । स्थाने नित्यप्रसन्नो भदन्तः तृष्णाच्छेदेन परिनिर्वाणमवाप्स्यसि । एषोऽञ्जलिप्रग्रहं करोति । किं ब्रवीषि— "साधुमुच्येऽयम्" इति । भवतु । अलं वृथाश्रमेण । सर्वथा दुर्लभः खलु ते मोक्षः । किं ब्रवीषि— "गच्छाम्यहमकालभोजनमपि परिहार्यम्" इति । ही ही सर्वं कृतम् । एतदवशिष्टमस्खलितपञ्चशिक्षापदस्य भिक्षोः कालभोजनमतिक्रामति । ध्वंसस्व । वृथामु-

रुवमश्रिवदुरूणापत्रपते । गच्छ, कुक्कोऽसि । हन्त ! व्यस्त एष दुरात्मा । तत् क नु खल्विदानीं दुष्टशाक्यभिक्षुदर्शनोपहतं चक्षुः प्रक्षालयेयम् । (परिक्रम्य)

साधु भोः प्रियजननयनपावनमुपस्थितम् । एष हि वसन्तवत्या दुहिता वनराजिका नाम वनराजिकेव रूपवती कुसुमसमाजमिव शरीरे संनिवेश्य यथार्हं पूजापुरस्कारमुपनीय कामदेवायतनादवतरति । यथा सर्वादरगृहीतपुष्पमण्डनाटोपा तथा शङ्के प्रियजनसकाशं प्रस्थितयानया भवितव्यम् । यावदेनां प्रियवचनोपन्यासेनोपसर्पामि । (निर्दिश्य) वासु वनराजिके वसन्तकुसुमाग्रथणं कुर्वन्त्या भवत्या नखल्वतिथिलोपः कृतः । किमाह भवती—"स्वागतमार्याय, अयमञ्जलिः" इति । प्रतिगृहीत एष दाक्षिण्यपल्लवः । आपिच, अचिरागतस्तावद्वसन्तस्त्वच्छरीरे संनिविष्टो ननु । किमाह भवती— "कथमिव" इति श्रूयतां तावत्—

वासन्तीकुन्दमिश्रैः कुरवककुसुमैः पूरितः केशहस्तो
लग्नाशोकशिखान्तः स्तनतटरचितास्सिन्दुवारोपहारः ।
प्रत्यग्रैश्चूतपुष्पैः प्रचलकिसलयैः कल्पितः कर्णपूरः
पुष्पव्यग्राग्रहस्ते वहसि सुवदने मूर्तिमन्तं वसन्तम् ॥

किं ब्रवीषि—"एष ते प्रदेयकः" इति । भवतु । त्वय्येवतावत्तिष्ठतु न्यासः । कालेनोपपादयिष्यामः । सुखं भवत्यै । प्रस्थितोऽस्मि ॥

अये इदमिरामकामिन्यास्ताम्बूलसेनायागृहम् । नित्यसंनिहितश्चात्र चान्त्रः । किंनु प्रविशामि । (विचार्य) न शक्यमनभिभाष्यातिक्रमितुम् । यावत्प्रविशामि । (प्रविश्य) अस्तिकोऽपि भोः सुहृत गृहे दाशं प्रतिपालयति ? अये इयं तांबूलसेना अस्मद्बहुमाना-

दविलम्बितत्वरितपदविन्यासा संभ्रमाद् भ्रष्टमुत्तरीयमाकर्षन्ती प्रद्वार एव प्रत्युद्गता। अत्युपचारः खल्वेषः। शङ्के, न मां प्रविशन्त मिच्छतीति। तदेषा बहिरेव प्रयोजयितुं निर्गता। यथास्याः प्रत्यग्रसुरतचिह्नान्युपलक्षये सद्यःसुरतभुक्तमुक्तयानया भवितव्यम्। नूनं दिवासुरतसंमर्दमनुभूतवानिरिमः। अहो सुरतलोलुपः खलु धान्त्रः। भवतु। परिहासिष्याम्येनाम्। ताम्बूलसेने किमिदं दाक्षिण्यातिव्ययः क्रियते। कथं सुरतपरिश्रमश्वासविच्छिन्नाक्षरं "स्वागतं प्रियवयस्याय" इत्याह। अविरक्तिके तालवृन्तन्तावदानय। कृतव्यायामा खलु ताम्बूलसेना। चोरि अपि बलं वर्धते? किं ब्रवीषि—"नखल्ववगच्छामि" इति। एतत्प्रियजनपरिष्वङ्गसंक्रान्तमालेयकं स्तनतटद्वयम। पृच्छामि तावत् असन्तुष्टे अनवरतनिशाविहारस्येरिमस्य दिवापि नाम त्वया न देयो विश्रमः। ननु सायंप्रातर्होमो वर्तते। किं ब्रवीषि—"सदापि नाम परपक्षपरिहासप्रियो भावः। नैतदस्ति" इति। अयि दुर्विदग्धे न त्वया श्रुतपूर्वं 'आकारसंवरणमप्याकार एव' इति। किं ब्रवीषि—"कथं जानीषे" इति। चोरि कथामेदं न ज्ञास्यामि। यथा—

विखण्डितविशेषकं मृदितरोचनाबिन्दुकं
कपोलतललग्नकेशमपविद्धकर्णोत्पलम्।
मुखं व्रणितपाटलोष्ठमलसायमानेक्षणं
प्रकाशयति ते दिवासुरतलोलुपं कामिनम्॥

किं ब्रवीषि—"सद्यस्सुप्तोत्थिताहं, किमप्याशङ्कसे" इति। भवतु। संज्ञप्ताः स्मः। न हि ते सूक्ष्ममपि किञ्चिद्ग्राह्यं पश्यामि—किन्तु।

स्वप्नान्ते नखदन्तविक्षतमिदं शङ्के शरीरं तव
प्रीयन्तां पितरः स्वधास्तु सुभगे वासोऽपसव्यं च ते।

किञ्चान्यत्त्वरया न लक्षितमिदं धिक्कस्य दुःशिल्पिनो
मोहाद्येन तवोभयोश्चरणयोः सव्ये कृते पादुके ।

चोरि सहोढाभिगृहीता केदानीं यास्यासि । एषा हि प्रविश्या-न्तर्गृहमुच्चैः प्रहसिता सह रमणेन । (कर्णं दत्वा) एष इरिमो व्याहरति—"ननु भोः धूर्ताचार्य प्रविश्यताम्" इति । सखे कः सुरतरथधुर्ययोर्योक्त्रच्छेदं करिष्यति । एवमेवाविरतसुरतोत्सवोऽस्तु । गार्गीपुत्र साधयाम्यहम् । (परिक्रम्य)

अये केयमिदानीं बाह्यद्वारकोष्ठके देवताभ्यो बलिमुपहरति ।

निभृतवदना शोकग्लाना निरञ्जनलोचना
मलिनवसना स्नेहाभ (त्य) क्तमलम्बघनालका ।
शिथिलवलया पुष्पोत्क्षेपैश्च्युताङ्गुलिवेष्टना
तरुणयुवतिस्तन्वी भूयस्तनुत्वमुपागता ॥

आः सैषा भाण्डीरसेनाया दुहिता कुमुद्वती नाम । भोः कष्टम् । अप्रत्यभिज्ञेया खल्वियं तपस्विनी संवृत्ता । तत् कस्येयं वेशवासविरुद्धं विरहयोग्यव्रतं चरति । आ विज्ञातम् । तमेषा मौर्यकुमारं चन्द्रोदयमनुरक्तेति श्रूयते । स च सुभगः सामन्तप्रशमनार्थं दण्डेनोद्यतः । हन्त ! भोः उपपद्यते चन्द्रोदयविरहात् कुमुद्वती निःश्रीका संवृत्तेति । भोः प्रत्यादेशः खल्वियं कुलवधूनाम् । अपि चैषा स्वभवनवलभीपुटस्थं विक्षिप्तबलिप्रणयोपस्थितं स्वागतव्याहारेणाभिनन्दति वायसम् । —

"भद्रं ते वलभीगवाक्षतिलक श्राद्धोपहारातिथे
जीवन्त्यां मयि कश्चिदेष्यति स मे नित्यप्रवासी प्रियः ।

यद्यागच्छति गच्छ तावदितरद्द्वाराश्रितं तोरणं
निःशोका हि समेत्य मे प्रियतमं दास्यामि दध्योदनम्" इति॥

अहो तु खलु निष्कैतवोऽनुरागः । अनपहासक्षममेतद्द्राजयौतकम् । मद्दिष्यावकुण्ठनभागिनी भवत्वेषा । इतो वयमेकान्तेन गच्छामः । (परिक्रम्य)

अये अयमिदानीं दक्षिणेन वृक्षवाटिकां भूषणप्रणादात्संभ्रान्तविहगसंकुलः शब्द इव श्रूयते । भवतु । अपावृतद्वारेयं वृक्षवाटिका । यावदवलोकयामि । (विलोक्य) ही ही ! ननु नयनोत्सवः खल्विह वर्तते । तथाहि— पाञ्चालदास्या दुहिता प्रियंगुयष्टिका नाम जघनोत्सेको [धो]पपादिताहङ्कारेण यौवननवराज्यकेन विलोभ्यमाना नानाविलासभावहावदाक्षिण्यसमुदितसखिजनपरिवृता कन्दुकक्रीडामनुभवति । यैषा—

प्रवाललोलाङ्गुलिना करेण मानःशिलं कन्दुकमुद्वहन्ती ।
स्वपल्लवाग्राभिहतैकपुष्पा नतोन्नता नीपलतेव भाति ॥

काममस्यास्सन्दर्शनमेवानर्घो लाभः । भवतु । सन्तुष्टस्यापि जनस्य नत्वमृते पर्याप्तिरस्ति । अतोऽभिभाषिष्ये तावदेनाम् (उपगम्य)

वासु प्रियङ्गुयष्टिके किमिदं कन्दुकक्रीडाव्याजेन नृत्तकौशलं प्रत्यादिश्यते सखीजनस्य । कथं स्थितमात्रदत्तप्रतिवचना क्रीडत्येव । यथा कन्दुकोत्पातान् गणयन्त्यस्याः परिचारिकाः, शङ्के पणितमनया सखीभिस्सहोपनिबद्धमिति । अहो पणितप्रीतिः । सर्वथा नतोन्नतावर्तनोत्पतनापसर्पणप्रधावनचित्रप्रचारमनोहरं यदृच्छया दृश्यमासादितं खल्वस्माभिः । किं बहुना । शङ्के, परिवर्तननिवर्तनोद्वर्तनपर्या-

ध्मातवसनान्तरप्रवेशकुतूहलो वायुरप्येनामभिकामोऽनुभ्रमतीति । यत्सत्यं स्वभावदुर्बलत्वादेकपाणिग्राह्यस्य यौवनपीठपयोधरभारनमितस्य बिभेम्यहमस्या मध्यविसंवादनस्य । न शक्याम्येनामुपेक्षितुम । अभिभाषिष्ये तावत् । अयि यौवनोन्मत्ते स्वसौकुमार्यविरुद्धः खल्वयमारम्भः क्रियते । विरम विरम तावत् । अये त्वां खलु ब्रवीमि । कथमुपारोहत्येवास्याः प्रहर्षः । हन्त ! इदानीमाशास्ये—

प्रेंखोलत्कुण्डलाया बलवदनिभृते कन्दुकोन्मादितायाः
चञ्चद्बाहुद्वयायाः प्रविकचविसृतोद्गीर्णपुष्पालकायाः ।
आवर्तोद्भ्रान्तवेगप्रणयविलसितक्षुब्धकाञ्चीगुणाया
मध्यस्यावलगमानस्तनभरनमितस्यास्य ते क्षेममस्तु ।

एषा पूर्णं शतमिति व्यवस्थिता । वासु प्रियङ्गुयष्टिके सखीजनपणितविजयेन दिष्ट्या वर्धसे । किं ब्रवीषि — "स्वागतमार्याय, हन्त ! विजयार्थं गृह्यताम्" इति । वासु त्वद्दर्शनमेवानर्घो लाभः । स्मर्तव्याः स्मः । साधयामो वयम् ।। (परिक्रम्य)

अये इदमपरं सुहृद्विनोदनायतनमुपस्थितम् । इदं हि चन्द्रधरकामिन्या नागरिकाया दुहितुः शोणदास्या गृहम । एष प्रविशामि । न शक्यमनभिभाष्यातिक्रमितुम । (प्रविष्टकेनावलोक्य) अये इयं शोणदासी किमपि चिन्तयन्ती द्वारकोष्ठक एवोपविष्टा । तत्किमिदानीं निर्मुक्तभूषणतया विविक्तशरीरलावण्या मलिनप्रावारार्धसंवृतशरीरा रक्तचन्दनानुलिप्तललाटा सितदुकूलपट्टिकावेष्टितशीर्षाऽवनतवदनचन्द्रमण्डलाऽङ्काधिरूढां वल्लकीमीषत्कररुहैरवघट्टयन्ती काकलीमन्दमधुरेण स्वरेण कैशिकाश्रयमाकूजन्ती तिष्ठति । उत्कण्ठितयाऽनया भावितव्यम् । कैशिकाश्रयं हि गानं पर्यायशब्दो रुदितस्य । किं नु खल्विदं अश्रुतपूर्वं मया चन्द्रोदयादेवप्रणयकलहकृतव्याहरणमनया (योः) ।

प्रियनिरोधात्पश्चात्तापगृहीतयाऽनया भवितव्यम् । भवतु । परिहसिष्याम्येनाम् । वासु शोणदासि किमिदं, वेशतापसी वेषः परिगृह्यते ? वासु न खल्वयमपराद्धश्चन्द्रधरः ? कथं तेऽश्रुमोक्षः प्रतिवचनम् । निगृह्यतां बाष्पः । कथ्यतां तावत्, । किं ब्रवीषि— "मानैकग्राहकुशलेन व्यापादितास्मि सखीजनेन" इति । ननु सर्वजनाधिका ते सखी शोणदासीं त्वाप्युत्थापयति ? किं ब्रवीषि—"तस्या एव दुर्मन्त्रितैरापदमिमामुद्वहामि" इति । अपण्डिता खल्वासि । ननु सा त्वयैवं वक्तव्या—

प्रायश्शीतापराद्धा क्षणमपि न पुनर्दूति मानक्षमाहं
तुष्टेदानीमनार्ये भव मदनतुलां मामिहारोप्य घोराम् ।
मानैकग्राहवाक्यैरनुनयविधुरैस्तावकैस्तत्कृतं मे
पाणिभ्यां येन संप्रत्यनुचितशिथिलां मेखलामुद्वहामि ।। इति ।

किं ब्रवीषि—"पराजित इदानीं मदनेन मानः । किन्तु स एव तु सौभाग्यकृतावलेपस्ते वयस्यः स्तब्ध" इति । ततः किमिदानीं नाभिसार्यते ? सुन्दरि अलमलं व्रीळया ।

निश्वस्याधोमुखी किं विचरसि मनसा बाष्पपर्याकुलाक्षी
शैथिल्याद्भूषणानां स्वयमपि सुभगे साध्ववेक्षस्व भावत् ।
हित्वा कूलस्थवाक्यान्यनुनय रमणं किं वृथा धीरहस्तैः
संरूढस्यातिमूढे प्रणयसमुदयस्यातिमानोऽवमानः ।।

किं ब्रवीषि—"स्त्रिया नाम पुरुषोऽनुनेयः, ननु शौण्डिर्यम्" इति । मा तावत् । अतिमनस्विनि किं न गङ्गा सागरमभियाति ? अलमलं व्रीळया । अथवा सकामास्तु भवती । अहं चन्द्रधरमेवानुन-

यामि । किं बहुना । अद्यैव ते चिरविरहसमारोपितस्य मदनाग्नि-होत्रस्य पुनराधानं करोमि । कथमनवासितबाष्पयैव स्मितमनया । इदं खलु वर्षर्तुज्योत्स्नादर्शनम् । सुन्दरि अलमलं रुदितेन । प्रत्युपस्थितं कल्याणम् । किं ब्रवीषि—"सत्यप्रतिज्ञेनेदानीं भावेन भवितव्यम्" इति । प्रभाते ज्ञास्यसि । कथमुपरतो बाष्पः । साधयाम्यहम् (परिक्रम्य)

अहो इदमपरं शृङ्गारप्रकरणमुपस्थितम् । एषा हि नागरिकादुहिता गणिका मगधसुन्दरी नाम शरदमलशशिसदृशवदना असितमृदुकुञ्चितस्निग्धसुरभिशिरसिरुहा विकसितकुवलयदललोललोचनयुगा विद्रुमचारुतरताम्राधरसंपर्कपरिपाटलदशनमयूखा कुन्दकुसुममुकुलधवलसमसहितशिखरदतीपीनकपोलम्नोरुजघनचक्रा बाह्यद्वारकवाटार्द्धसंवृतशरीरा दक्षिणहस्ताङ्गुलिद्वयेन तिरस्कारिण्येकदेशमवलम्बमाना वामचरणकमलैकदेशेन भूतले तालमभिसंयोज्य रक्तस्वरमधुरतारसंयुक्तामसंकीर्णवर्णा मवघुष्टालङ्कारालङ्कृतां श्रोत्रमनोहरां षड्जग्रामाश्रयां वल्लभां नाम चतुष्पदां आकूजमाना नेत्रभ्रूक्षेपैः संकल्पितान् भावानभिनयन्ती कस्यापि सुभगस्यागमनं प्रतीक्षमाणा तिष्ठति । भोः को नु खल्वयं महेन्द्र इव सुरतयज्ञायाहूयते । भवतु । पृच्छाम्येनाम् । भवति वेशमेघविद्युल्लते पृच्छामस्तावत्—

शुक्लासितान्तरक्ता सापाङ्गावीक्षिणी विकासितयम् ।
धन्यस्य कस्य हेतोश्चन्द्रमुखि बहिर्मुखी दृष्टिः ॥

हा धिक् वित्रस्तमृगपोतिकेव सन्त्रस्तया दृष्ट्या मां निरीक्षते । प्रत्यागतचित्तयानया भवितव्यम् । किं ब्रवीषि—"मामैवम् । ब्रह्मचारिणी खल्वहं वसन्तमुपवसामि" इति । श्रद्धेयमेतत् । अयमिदानीं सरसदन्तक्षतोऽधरोऽष्ठः किमिति वक्ष्यति ?

किं ब्रवीषि—"सावशेषतुषारपरुषस्य वसन्तवायोः पत्रान्येतानि" इति । भवतु तावत् । संज्ञप्ताः स्मः ।

दन्तपदजर्जरोष्ठी यथा च नियमं त्वमात्मनो वदसि ।
सुव्यक्तमव्रतघ्नं चुंबितचान्द्रायणं चरसि ॥

एषा संवृत्य कवाटेन मुखं प्रहसिता । तपोवृद्धिरस्तु भवत्यै । साधयाम्यहम् । (परिक्रम्य)

भोः एष कथंचिद् वेशयुवतिप्रलापशृंखलामुन्मुच्य प्राप्तोऽस्मि देवदत्ताया गृहम् । अपीदानीं देवदत्ता गता स्यात् । किंनु खलु पृच्छेयम् । (विलोक्य) आ अयं तावद्वृक्षवाटिकापक्षद्वारेणातिक्रामति भावगन्धर्वदत्तस्य नाटिकाचार्यस्यान्तेवासी दर्दुरको नाम नाटेरकः । यावदेनं पृच्छामि । (निर्दिश्य) अंघो दर्दुरक कुतस्त्वमागच्छसि? अपि जानीषे किं देवदत्ताकरोतीति । किमाह भवान्— "गता खलु देवदत्ता सुखप्रश्नार्थमार्यमूलदेवं द्रष्टुम् । अहन्तु देवसेनां द्रष्टुमाचार्येण प्रेषितोस्मि" इति । अथ केन कारणेन? किं ब्रवीषि—"कुमुद्वतीभूमिकाप्रकरणपत्रमुपनयेति" इति । अथोपनीतं, पत्रकं गृहीतं च तया ?

किं ब्रवीषि—"आचार्यगौरवात् प्रतिगृहीतं तत्पत्रकं तया पार्श्वस्थायास्तु सख्या हस्ते न्यस्तम् । अपि च कुमुद्वत्यै नमस्कृत्योक्तवती—'अस्वस्था तावदस्मि' इति" इति । हन्त! प्रसिद्धतर्काः स्मः । एतदस्याः कामैकतानतां सूचयति । अंघो दर्दुरक किमिदं पत्रकेऽभिलिखितम् ? किं ब्रवीषि—"वाचयस्व" इति । (गृहीत्वा वाचयति)

कान्तं कन्दर्पपुष्पं स्तनतटशशिनं रागवृक्षप्रवालं
शय्यायुद्धाभिघातं सुरतरथरणश्रान्तधुर्यप्रतोदम् ।

उन्मेषं विभ्रमाणां करजपदमयं गुह्यसंभोगचिह्नं
रागाक्रान्ता वहन्तीं जघननिपतितं कर्कशाः स्त्रीकिशोर्यः ॥

साधु भोः कर्कशस्त्रीकिशोरीप्रतारणायाभिप्रस्थितस्य मे महदिदं मङ्गलमर्थसिद्धिं सूचयति । अयो दर्दुरक अपि जानीषे कुत्रस्था देवसेनेति । किं ब्रवीषि—"वृक्षवाटिकां गता" इति । हन्त! मदनकर्मान्तभूमौ वर्तते । साधु । गच्छतु भवान् । प्रविशामस्तावत् (प्रविश्य) अये इयमियं देवसेना—

कृशा विवर्णा परिपाण्डुनिष्प्रभा
प्रभातदोषोपहतेव चन्द्रिका ।
वहत्यसाधारणगूढवेदनं
मनोमयं व्याधि मदारुणौषधम् ॥

आ यथैवं सर्वगुह्यधारिण्या स्नेहातिसृष्टसखीभावया प्रियवादनिकया नाम परिचारिकया सह परिवर्जितान्यजना वायुं पर्युपास्ते । भवतु । एतदप्यस्या एकतानतां सूचयति । सर्वोऽपि विविक्तकामः कामी भवति । अस्मद्विषयगतेयम् । यावदेनामुपसर्पामि । (उपेत्य)

वासु देवसेने विस्रम्भालापविच्छेदकारिणो न खलु वयमसूयितव्याः । किं ब्रवीषि—"स्वागतं भावाय । अभिवादयामि"इति । भवतु । प्रतिगृहीतस्समुदाचारः । अलमलं प्रत्युत्थानयन्त्रणया । किमाह भवती— "उपविश, इदमासनम्" इति । बाढमुपविष्टोऽस्मि । वासु किमिदं बन्धुजनसन्तापः क्रियते ? को नामायमचक्षुर्ग्राह्यो गूढवेदनः स्वयंग्राह्यः प्राक् केवलो व्याधिः । किं ब्रवीषि— "न खलु किञ्चित्" इति । अयि पण्डितमानिनि अलमस्मान् विक्षिप्य । सदापि नाम त्वमस्माकं बालक्रीडनकान्वेषणादिषु प्रणयवती । अपि

च, सएवाहं मूलदेवसख: शश: । तदुच्यतां सद्भाव: । किमाश्रयोऽयं सन्ताप: ? तव हि—

अव्याधिग्लानमङ्गं करतलकमलापाश्रितं गण्डपार्श्वं
दृष्टिर्ध्यानैकताना जलमिव हृदयं जृंभणा वर्णभेदः ।
निश्वासायासकर्ता न च न रतिकरस्तापनश्चेन्द्रियाणा
मेकद्रव्याभिलाषी प्रतिनव इव ते चोरि कोऽयं विकारः ॥

कथं निश्वसितमनया । हन्त सन्धुक्षितो मदनाग्नि: । भवतु । इदानीमात्मगतं भावमस्या ज्ञास्याम: । यदि वामपार्श्वीभूता विस्रंभाणा मरोगास्तु भवती । साधयाम्यहम् । किं ब्रवीषि—"चपल: खलु भाव:" इति । हन्त! प्रतिज्ञातम् । एषापि मर्म वक्ष्यति । वासु कुतो मे धृति स्तवेदृशेन शरीरोदन्तेन । अपि च, दीर्घसूत्रता नाम कार्यान्तरमुत्पादयति । तदुच्यतां सन्तापकारणम् । किं ब्रवीषि—"न खलु मे भावं प्रति गुह्यमस्ति । अयन्तु वसन्तस्वभाव:—यन्मे गुरुजनयन्त्रणया निभृतस्यापि मनसः किमप्यकारणेनौत्सुक्य मुत्पादयति" इति । साधु भो: नायं व्याधिव्यपदेश: । चोरि एतदपि जानीषे साधु युवती खलु देवसेना संवृत्तेति । वासु यद्येवं अलमलमनुबन्धेन । ऋतुपरिणामेन स्वस्था भविष्यसि । कथं व्रीलितमनया । प्रियवादिनिके किमिदं तालपत्रकेऽभिलिखितम् ? किं ब्रवीषि—"नाटकभूमिका" इति । पश्यामस्तावत् । (गृहीत्वा वाचयति)—

"कुमुद्वतीप्रकरणे शूर्पकसक्तां राजदारिकां धात्री रहस्युपालभते ।

'उन्मत्ते नैव तावत्स्तनविषममुरो नोद्गता रोमराजिः
न व्युत्पन्नासि च त्वं व्यपनययुवतीदोहलं दुर्विदग्धे ।
व्युत्पन्नाभिः सखीभिः सततमविनयग्रन्थमध्याप्यसे त्वं
केनेदं बालपक्षे मनसिजकदनं कर्तुमभ्युद्यतासि' ॥

किमाह देवसेना—"एतत्तावन्मयैव न श्रुतमस्ति" इति। हन्त! एष उद्गीर्णः स्वभावः। इत्थमहमपि कामयामीत्युक्तं भवति। किमाह देवसेना—"हृलग्राही भावः" इति। वासु अलमलमस्मान् विक्षिप्य। मेघावगूढमपि चन्द्रमसं कुमुद्वतीप्रबोधः सूचयति। गच्छ पुरुषद्वेषिणि; आपन्नेदानीमासि॥

नैवाहं कामयामीत्यसकृदभिहितं यत्त्वया गूढभावे
सा त्वं तन्वीस्वभावात्कथय तनुतरा चोरि केनासि जाता।
हस्तप्रत्यस्तगण्डे प्रशिथिलवलये भिन्ननिःश्वासवक्त्रे
व्याधिक्लिष्टो जनोऽयं किमिदमतिशठे वाद्यते धीरहस्तः॥

किमाह प्रियवादिनिका—"सति प्रवृत्ते कामतन्त्रप्रकरणे दिष्ट्येदानीमस्मत्स्वामिनी पुरुषविशेषमनुरक्ता, न पृथग्जनम्" इति। तत्कस्यायमवन्तिनगर्यां पुरुषविशेषशब्दः प्रचरति? किमाह भवती—"कस्य तावत्त्वयाभ्युपगम्यते" इति। कस्यान्यस्य, ननु कर्णीपुत्रस्य। स हि—

कुले प्रसूतः श्रुतवानविस्मितः
स्मिताभिभाषी चतुरो विमत्सरः।
प्रियंवदो रूपवयोगुणान्वितः
शरीरवान् काम इवाधनुर्धरः॥

किं अधोमुखी देवसेना संवृत्ता। अलमलमनिभृते दुकूलदशान्तोद्वेष्टनेन। कथ्यतां तावत्। किमभाजनीभविष्यामः? कथं समौनमेवास्ते। अथवा लज्जा नाम विलासयौतकं प्रमदाजनस्य, विशेषतश्चाप्रौढकामिनीनाम्। तदेषा कथमिव स्वयं वक्ष्यति। तत्कामं पुरुषविशेष इत्यसाधारण एव शब्दः कर्णीपुत्रे प्रतिवसति।

तथापि नाम त्वलब्धगांभीर्यो धृतिमुपयात एनां व्याहारयामि । वासु देवसेने किमस्माकं पररहस्यश्रवणेन । उदासीनाः खलु वयम् । तदामन्त्रये भवतीम् । कर्णीपुत्रोऽपि पाटलीपुत्रविरहात् स्वजनदर्शनोत्सुको भृशमस्वस्थः । स एषोऽद्य श्वो वा प्रस्थास्यते । पुनर्द्रष्टास्मि भवतीम् । किन्तु स्वस्थरूपया त्वया भवितव्यम् । स्मर्तव्याः स्मो वयम । (इत्युत्थाय प्रस्थितः । सत्वरं निवृत्त्य) अये केनैतदुक्तं "हन्त व्यापन्नेदानीम्" इति । आ देवसेना कथं रोदिति । वासु किमिदम । अलमलं रुदितेन । भवतु । गृहीतम् । दिष्ट्या पात्रगतो मनोरथः । कर्णीपुत्रस्यापि त्वन्मय एव व्याधिः । तदितरेतरस्यौषधत्वेन कल्पयितव्यम । किं ब्रवीषि—"किमुच्चैः कथयसि, दुःखशीलः खलु भावः" इति । अलमलं यन्त्रणया—

दक्षात्मजाः सुन्दरि योगताराः
किं नैकजाताः शशिनं भजन्ते ।
आरुह्यते वा सहकारवृक्षः
किं नैकमूलेन लता द्वयेन ॥

किं ब्रवीषि—"तथेदानीं संप्रधार्यतां यथोभयं रक्ष्यते" इति । अथ किम । संप्रधारितमेवैतत् । श्वः किल ते भगिनी यथोचितमाचार्यगृहं नृत्तवारेण यास्यति । ततो लब्धान्तरावित्रंभा सुभगे सुखप्रश्नव्याहारव्याजेन त्वं वा तत्र यास्यसि स वेहागामिष्यति । किमियं विमर्शडोला वाह्यते ? किमाह प्रियवादिनिका—"न ममेहार्यपुत्रस्यागमनं रोचते—यथात्रभवत्यास्तत्र गमनम् । गणिकाजनो नाम पैशुन्यप्राभृत एषा जातिः । तस्मादहमेव यथोचितं योजयिष्यामि—यथा नृत्तवारात्प्रस्थिताद्य देवदत्ता स्वयमेव मम स्वामिनीं

सुखप्रभाभिगमनेनार्यमूलदेवसकाशमनुनेष्यति" इति । साधु प्रियवादिनिके इदानीं खलु यथार्थनामता । उचितं चास्यास्तत्र गमनम् । किन्तु स्वस्थरूपयानया भवितव्यम् । किमाह देवसेना—"ननु भावदर्शनात्स्वस्थैवाहम्" इति । प्रियं मे । कृतं मदनकर्म । कर्णीपुत्रप्राणधारणार्थं किञ्चित्स्मरणीयं दातुमर्हसि । किं ब्रवीषि—"किं दास्यामि" इति । किं नाम विचार्यते । इदं खलु—

ईषल्लीलाभिदष्टं स्तनतटमृदितं पत्रलेखानुविद्धं
खिन्नं निश्वासवातैर्मलयतरुरसक्लिष्टकिंजल्कवर्णम् ।
प्रातर्निर्माल्यभूतं सुरतसमुदयप्राभृतं प्रेषयास्मै
पद्मं पद्मावदाते करतलयुगलभ्रामणक्लिष्टनाळम् ॥

कथं कटाक्षपातेनैतदनुज्ञातमनया । हन्त ! प्रतिगृहीतं प्राभृतं सुरतसत्यंकारस्य । यावदनेनौषधेन कर्णीपुत्रं सञ्जीवयामि । (गृहीत्वोत्थाय स्थित्वा) प्रस्थितोऽस्मि । सुखं भवत्यै । सुभगे गृह्यतामाशीः—

भयद्रुतमसूचितप्रचलमेखलानूपुरं
सशङ्काशिथिलोपगूहमवमुक्तनीवीपथम् ।
स्वयं समभिवाहयत्वयमुदात्तरागायुधः
तव प्रथमचोरिकासुरतसाहसं मन्मथः ॥

(इति निष्क्रान्तो विटः)

इति श्रीशूद्रकविरचितः पद्मप्राभृतकं नाम भाणः
समाप्तः

शुभम्

श्रीः

ईश्वरदत्तप्रणीतः

धूर्तविटसंवादः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू— विद्यया ख्यापिता ख्यातिः सज्जनाराधनं धनम् ।
तेषां प्रीत्या भवेद्धर्म इत्यस्माकमुपक्रमः ॥

तस्मादार्यजनप्रीत्यर्थं किञ्चिन्नाटकमारभामहे । आर्ये सधनजनप्रीतिवर्धनकरायामधनानां यौवनोत्पीडितमन्दभाग्यानां शोकवर्धनकरायां कुमुदकुवलयकल्हारकमलनिचुलकेतकीककुभकन्दलीषण्डमण्डितायामस्यां प्रावृषि हृदयप्रीतिजननं किञ्चिद् गीतं गीयताम् । अयं खलु तावत्कालः—

जलधरनीलालेपः तटित्समालभनाविद्धलद्गात्रः ।
विकासितकुटजनिवसनो विटो यथा भाति घनसमयः ॥

(निष्क्रान्तः)

स्थापना ।

(ततः प्रविशति विटः)

विटः— साध्वभिहितमेतत्—

श्रीमद्वेश्मसृदङ्गवाद्यकुशला धाराः सृजन्त्यम्बुदाः
क्रुद्धस्त्रीभ्रुकुटीतरङ्गकुटिला विद्युल्लता द्योतते ।
गाढालिङ्गनहेतवः प्रचलिताः शीताः पयोदानिलाः
कामः कामिमनस्सु मुञ्चति दृढानाकर्णपूर्णानिषून् ।

अपि च,

ते दग्धाः प्रवसन्ति ये समदना नायान्ति वा प्रोषिता
मुग्धास्तेऽनुनयन्ति ये न कुपिताः कुप्यन्ति वात्यायतम् ।
धन्यास्ते खलु ये प्रियावशगता येषां प्रिया वा वशे
कालः कामयतीव मेघपटहैरेवं जगद्घोषणाम् ॥

अहो तु खलु जलदकालस्य ललितजनमनोग्राहिणी बहुवृत्तान्तता । संप्रति हि --- सजलजलदावरुद्धदिनकरकराः सोपस्नेहा भूमिभागाः बहुदिवससदृशवृत्तान्ततया सौकुमार्यमिवोपगता दिवसाः । कुटजगन्धावर्तितमधुकराणि प्रवृत्तनृत्तबर्हिणानि शीताम्बुवन्ति विहारक्षमाण्यरण्यानि । प्रचलितेन्द्रगोपका नवहरिततृणाङ्कुराः सालक्तकयुवतिचरणविन्यासयोग्या वनभूमयः । कलुषसलिलवाहिन्योऽविभावनीयतीर्थाः शठा इव नार्यो दुरवगाहा नद्यः । अपि च,

कदम्बगन्धमादाय वनान्तरविनिःसृतः ।
आयाति धाराशिशिरः सप्राभृत इवानिलः ॥

तद्रमणीयोऽयं कालः । न चास्मिन्नौत्सुक्यं न भवति । कुतः—

भ्रान्तपवनेषु संप्रति सुखिनोऽपि कदम्बवासितवनेषु ।
औत्सुक्यं वहति मनो जलधरमलिनेषु दिवसेषु ॥

तच्च द्विविधमौत्सुक्यं भवति— कारणादकारणाच्च । तत्र कारणोद्भूतस्यौत्सुक्यस्य शक्या प्रतिक्रिया कर्तुम् । यत्त्वकारणादुत्पद्यते तत् कुम्भदासीकृतकरुदितमिव दुश्चिकित्सं भवति । वयञ्च कानिचिदिमान्यहानि दुर्दिनदोषादल्पपदप्रचारत्वाच्च भृशतरमुन्मनसः संवृत्ताः । कुटुम्बिन्याश्च नः कण्ठमाधुर्येण तेनाप्यायितमनसोऽप्यपयानमेव बहुमन्यामहे । (विलोक्य)

दिष्ट्येदानीं सुदिनं संवृत्तम् । निवृत्तसङ्गीतमृदङ्गसन्निभाः प्रशान्तरवा मेघाः। दुर्दिनदोषचकितः प्रासादशिखरमारुह्य पक्षौ वितत्य विरौति गृहमयूरः। सन्दष्टोपवीणाविमुक्तविरलतन्त्री शीतवातवेपितेव कामिनी बालातपमासेवते वीणा । निष्ठीवन्तीव विमलमुक्तादामसन्निभान् प्रणालीमुखैस्तोयावशेषान् हर्म्यस्थलानि । दुर्दिनदोषान्निष्प्रभाः संप्रमृज्यन्ते दर्पणाः । अपि च—

प्रवरगृहनिरोधखेदालसा यान्ति वातायनान्यङ्गना
जलदसमयदोषगाढार्पणा हेमकाञ्ची पुनर्योज्यते ।
उपवनगमनाय सञ्चार्यते वारमुख्यो जनः कामिभिः
तरुणतृणसखेषु लाक्षारसः पात्यते पादपद्मेष्वनङ्गावहः ॥

तत् क्वनु खल्विदमौत्सुक्यं विनोदयेयम् । किं नु द्यूतसभायामाहोस्वित् वेशवाटे । (विचार्य) नमोऽस्तु द्यूताय । एकशाटिकामात्रावशिष्टो हि नः परिच्छदः । अक्षाश्च नामानभिजातेश्वरा इव न सर्वकालसुमुखा भवन्ति। ततो वेशमेव यास्यामः। तत्र हि-

कान्तान्यर्धनिरीक्षितानि मधुरा हासोपदंशाः कथाः
पीनश्रोणिनिरुद्धशेषमतुलस्पर्शं तदर्धासनम् ।
स्नेहव्यक्तिकरान् करव्यतिकरास्तांस्तांश्च रम्यान् गुणान्
वेश्याभ्यः प्रणयादृतेऽपि लभते ज्ञातोपचारो जनः ॥

(निरीक्ष्य) संव्रियतां द्वारम् । किमाह भवती— "वल्मीकमिव बहुद्वारं ते गृहम्" इति । यद्यप्यन्योऽस्ति नगरघट्टकानां प्रवेशाय मार्गः तथापि तैरन्यगृहपरिचयाद् द्वार एव लक्ष्यं गृह्यते। अपि च अलमुत्तरोत्तरेण । हा ध्वस्तोऽस्मि । (परिक्रम्य) स्थाने खलु कुसुमपुरस्यानन्यनगरसदृशी नगरमित्यविशेषग्राहिणी पृथिव्यां स्थिता कीर्तिः । बहूनि खल्वस्य पुरस्य गृहाण्युच्छ्रायवन्ति । प-

ण्यसमुदायाजनबाहुल्याच्च तांस्तांश्च समृद्धिविशेषान् दृष्ट्वा विस्मयते जनः। तत्र को विस्मयः? सन्ति ह्यन्यान्यपि समृद्धिमन्ति पुराणि। येत्वस्य निःसाधारणा गुणास्तान् वक्ष्यामः। तथा हि—

दातारः सुलभाः कला बहुमता दाक्षिण्यभोग्याः स्त्रियो
नोन्मत्ता धनिनो न मत्सरयुता विद्याविनीता नराः।
सर्वः शिष्टकथः परस्परगुणग्राही कृतज्ञो जनः
शक्यं भो नगरे सुरैरपि दिवं सन्त्यज्य लब्धुं सुखम्॥

(परिक्रम्य)

अये श्रेष्ठिपुत्त्रः कृष्णिलकः खल्वसौ वेशप्रसङ्गात् सफलीकृतयौवनोऽसद्धिधजनप्रणयभाजनीभूतः कुटुम्बात्ययभीरुणा पित्रा प्रयत्ना द्रक्ष्यमाणः कथमपि वेशं गत्वा प्रियोपभुक्तशोभिना वपुषा द्रुततरमित एवाभिवर्तते। अवश्यमभिनन्दयितव्यः। उपगमिष्यामस्तावदेनम्। (उपगम्य) भोः कृष्णिलक एवमेव सफलीकृतयौवनो भवतु भवान्। ननु खलु माधवसेनाया गृहादागम्यते? किं ब्रवीषि— "कथं विज्ञातवान्" इति। किमत्र विज्ञेयम्। सदृशसंयोगी हि भगवान् मदनः। न चाहं भवद्व्यापारान्निवृत्तः। अथवा अविरतसुरततृष्णां कामिनीमुत्सृज्य क्वासि प्रस्थितः? किमाह भवान्— "एतत्त्विदानीं कथं विज्ञातवान्" इति। एतदपि नातिसूक्ष्मम्। कुतः—

हस्ते ते परिमृज्य(ष्ट) साश्रुवदनं(ने) नेत्राञ्जनं लक्ष्यते
केशान्तो विषमश्च पादपतनाद्द्याप्ययं तिष्ठति।
व्यक्तं तत्र मनो निधाय भवता मुक्ता शरीरेण सा
मार्गे पांत इवानिलप्रतिहतः कृच्छ्रात् तथा गाहसे॥

किं ब्रवीषि— "तातं तावदवलोकयिष्यामि" इति। कथमनेनैव वेषेण? अवस्कन्दं दास्यति। किं ब्रवीषि— "यदीदृशी-

मवस्थां तातो मे पश्येत् जीवितपरित्यागमपि कुर्यात्" इति । अनवरतसूरततृष्णां कामिनीं त्याजयता किं तेन न कृतम् । पिता नाम खलु सयौवनस्य पुरुषस्य मूर्तिमान् शिरोरोग: । न च किल भो: पितृमता शक्यं परस्परामर्षविवर्द्धितपणरागस्य साधिक्षेपवचनालङ्कृतस्य तेजस्विपुरुषनिकषोपलस्य द्यूतस्य दर्शनमात्रमप्युपलब्धुम् । न च किल शक्यं समुपचितोत्पलखण्डकानां सहकारतैलोद्गतचन्द्रकाणां कामिनीनि:श्वासविक्षोभिततरङ्गाणां प्रनृत्तबर्हिणाकाराणां वारुणीचषकाणां गन्धमात्रमपि विघ्रातुम् । न च किल शक्यं द्विधाभूतगोष्ठीजनेषु वयस्यार्धासनोपविष्टगणिकाजनेषु कामिनीसान्निध्या दर्मीमांसितपणेष्वासक्तमण्डलेषु पक्षियुद्धेषु प्राश्निकत्वमपि कर्तुम । न च किल शक्यं वातायनाभोगविनिष्पातितपीनपयोधराभि: ससंभ्रमोद्धूतललिताग्रहस्ताभि: पौरवधूभि: सबहुमानमवेक्ष्यमाणस्य मदरभसस्य गजपते: पन्थान मनुसर्तुम् । नच किल शक्यं अर्धोरुकपरिहितेनाकृष्टखड्गमात्रसहायेनाकृपणां वृत्तिमाकांक्षता मित्रार्थे बन्धनच्छेदोद्यतेन प्रज्वालितोल्कापिङ्गलासु वीररात्रिषु नरपतिमार्गमवगाहितुम् । नच किल शक्यं प्रत्युपकारचिन्तोपहतचित्तेन सन्निवृत्तश्लाघादोषेण प्रत्युपकारपीडितेन मित्रार्थे सर्वस्वत्यागं कर्तुम् । सर्वं चैतत्सह्यम् । यत्तु दासी (स्या:) पुत्रा: पितर: स्वयमप्यननुभूतयौवना इव धनकुप्यार्थे वेशवधूभ्य: पुत्रान् वारयन्ति अत्र मे गृहीतपरशोर्जामदग्न्यस्य रामस्य क्षत्रियवधोद्यतस्येव लोकमपैतृकं कर्तुं मतिर्जायते । अथवा यौवनमतिलंघितं नु कुवृद्धै: । नचैतद्विजानन्ति तपस्विन:—यथा विकचकमलान्तर्गतसलिलसुरभिरमृतरससदृशास्वादो मृतमपि पुरुषं संजीवयेद्वेश्यामुखरस इति । अपि च—

काञ्चीतूर्यमसक्तपीनजघनं विस्रम्भदत्ताधरं
श्वासोत्कंपितनर्तितस्तनतटं भ्रूभेदजिह्मेक्षणम् ।
सीत्कारानुविषक्तरोमपुलकं कालेन कोपाश्रितं
वेश्यानां क इहाप्ति भो मदवशादाज्ञारतं विस्मरेत् ॥

किं ब्रवीषि—"अन्यच्च कष्टं भावाय निवेदयामि" इति । किं तत् । किं ब्रवीषि— "तातः किल मां दारकर्मणि नियुङ्क्त" इति । धिङ्मा मस्तु । मातावद्धोः ईदृशं कष्टम् । ईदृशमपि नाम मया श्रोतव्यम् । शक्यं किलोर्ध्वहस्तेनाक्रन्दितुं वेश्यामहापथमुत्सृज्य कुलवधूकुमार्गेण यास्यतीति । पश्यतु भवान्—

जात्यन्धां सुरतेषु दीनवदना मन्तर्मुखाभाषिणीं
हृष्टस्यापि जनस्य शोकजननीं लज्जापटेनावृताम् ।
निर्व्याजं स्वयमप्यदृष्टजघनां स्त्रीरूपबद्धां पशुं
कर्तव्यं खलु नैव भोः कुलवधूकारां प्रवेष्टुं मनः ॥

किं ब्रवीषि—"एष एव मे निश्चयः" इति । यद्येषभवतो निश्चयः प्रीता स्मः । सदृशमस्मत्संसर्गस्य । गच्छ । इदानीं गृहमेवागम्य पुनरपि त्वां संज्ञामुपलंभयामि । (परिक्रम्य) अयं हि तावदत्याकीर्णजनतया प्रकीर्णवीचिवलय इव सलिलनिधिः सुभीमदर्शनोऽसुखोऽवगाहितुं कुसुमपुरराजमार्गः । इह हि—

यो मां पश्यति सत्वरोऽपि न कथां छित्वा प्रयात्यन्यतः
संबाधेऽपि ददाति चान्तरमसौ सर्वः प्रहृष्टो जनः ।
कश्चिन्नातिचिरं विळम्बयति मां कार्यात्ययाशङ्कया
लोकज्ञैः पुरुषैरहो पुरवरस्यास्मं यशो लक्ष्यते ॥

(परिक्रम्य) अये विटमतिरिव वेशगामिनीयं रथ्या । इतो या-

स्याम: । मया हि—

कृत इह कलहो हृतेह वेश्या
चकितमिह द्रुतमीक्षणं निमील्य ।
इति वयसि नवे यदत्र भुक्तं
तदनु विचिन्त्य समुत्सुको व्रजामि ॥

(परिक्रम्य) हन्त ! लब्धा: प्राणा: । एष वेशमेवास्मि प्रविष्ट: । (स्पर्शं रूपयित्वा)

निषेव्य संलोलितमूर्धजानि
वेश्यामुखान्यर्धनिरीक्षितानि ।
आयाति माल्यासवगन्धविद्धो
वेशस्य निश्वास इवैष वायु: ॥

अहो नु खलु कैलासशिखराकारप्राकार(साद)शिखरस्य वेशवधूस्तनतटोपमर्द्यमानगवाक्षस्य सञ्चारितागरुधूपदुर्दिनस्य पुष्पोपहारप्रहसितगृहोपद्वारस्य प्रणादिकाञ्चीतूर्योत्कण्ठकामिजनस्य नूपुरस्वनगद्गदभाषिण: कामकर्मान्तभूतस्य वेशस्य परा लक्ष्मी: । इह हि—समुद्यतकटाक्षप्रहरणा: स्फुटहसितोन्मीलितदशनपङ्क्तयो निभृतभ्रूलतानुवृत्तवचनविन्यासा: पीनपयोधरत्वादनवस्थितलघुप्रावरणा विभ्रमादप्रावरणाश्च विभ्रमविलसितललितचपलगतय: कामविजयपताका इव इतस्तत: सञ्चरन्ति गणिकापरिचारिका: । नित्यस्मितालंकृतमुखानामविस्मयविस्मिताक्षीणां स्निग्धसुकुमारकुटिलतनुदीर्घकृष्णकेशीनां श्रोणीचक्रोद्वहनमन्दपरिक्रमाणां मत्तद्विरदपरिभावगामिनीनां सुरतप्रपाणामिव तत्र तत्र विचरन्तीनामनिभृतमधुरचेष्टितानां गणिकादारिकाणां दृश्यन्ते विलासनिधयो रूपविशेषा: । अपि च, अनवरतमृदङ्गनिस्वना: संभ्रान्तपारावतमिथुना गर्जन्तीव प्रासादमाला: । आ-

श्लाघ्यमानशिल्पिजनानि संभ्रान्तप्रेष्यवर्गलुलितपुष्पोपहाराणि स्पर्धन्त इवान्योन्यं भवनद्वाराणि । रतियुद्धश्रमापहारीणि संयोज्यन्ते गन्धतैलानि । पीनस्तनतटविसर्पिण: पिष्यन्ते वर्णका: । मनस्विनीजनहृदयसुकुमारा आदीयन्ते माल्याभियोगा: । प्रियावचनामिव श्रोत्रावधानकरं श्रूयते वल्लकीवाद्यम् । प्रियजनाधरोपदंशप्रणयी प्रचरति शीधु: । अपि च —

नेत्रैरर्धनिमीलितैः स्तनतटैः सव्याजसन्दर्शितैः
हासैर्व्रीलविभूषितैः श्रुतिसुखैरल्पाक्षरैर्भाषितैः ।
मन्दैर्निश्वसितैः स्वभावमधुरैर्गतैश्चतालान्वितैः
नित्याकृष्टशरासनं मनसिजं कुर्वन्ति वेश्याङ्गनाः ॥

(परिक्रम्य) अये इयं खलु तावद्यौवनमदानवेक्षितस्तनप्रावरणा पेलवांशुककृतपरिधाना जघनाभरणकृतनीवी विभ्रमावमुक्तैककर्णपाशेन वित्रस्तहरिणचञ्चलाक्षेण निभुक्तपिण्डितोष्ठेन मुनीनामपि मन:कंपनसमर्थेन सुलभहसितेन मुखेन मदनसेनाया: परिचारिका वारुणिका नाम वामहस्ताङ्गुलिसंदंशेन कर्णोत्पलं कलयन्ती किञ्चिदुन्नतैकभ्रूलता मा मवेक्ष्य प्रहस्यातिक्रामति । अस्या हि—

रोमाञ्चं दर्शयता कपोलदेशे विशालजघनायाः ।
कर्णोत्पलेन कृत इव निरक्षरं चुम्बनोद्घातः ॥

का शक्तिरनभिभाष्यातिक्रमितुम् । अभिभाषिष्ये तावदेनाम् । वासु वारुणिके निगृह्यता मात्मा । कथमस्मद्वचनं स्वलीकृत्य गच्छत्येव । सुन्दरि अनेन स्वलीकरणेन प्रीता: स्म: । कथं प्रहस्य स्थिता (उपेत्य) कृतमञ्जलिना । पृच्छामस्तावत्किञ्चित् केनास्य शरत्कमलरज:पुञ्जपिञ्जरस्य गगनतलोन्मुखस्येव चक्रवाकमिथुनस्य स्त-

नयुगळस्य ते प्रथमावतार: सुखमुपभुज्यते ? कथं "ह्री" इत्येकाक्षरमुक्त्वा सव्रीलमवेक्ष्य मां व्रजति तूर्णमनवसितार्धभाषिणी । तत्खलु कामस्य सर्वस्वं (परिक्रम्य)

अये बन्धुमतिका खल्वेषा स्वगृहद्वारकोष्ठगता पार्श्वोपविष्टया चतुरिकया प्रदीयमानप्रतिवचना भ्रूलतालम्बास्तिचिकुरां सायाह्ननलिनसुकुमारां दृष्टिं कृत्वा स्वयमेव मेखलां संयोजयति । अहो ! यौवनानुरूपो व्यापार: । अहो ! सुकुमारं कर्मानुष्ठितम् । अहो ! ललितोऽभिनिवेश: । अहो ! कार्कश्यं प्रकाशयते यत्न: । अहो ! दर्पोद्दंशनादाम संयोजयन्त्या किमिवानया नोक्तं भवति । अवश्यमस्या विहारकालचतुरता पूजयितव्या । इदमपगम्यते । (उपेत्य) वासु कर्मसिद्धिरस्तु ते । भवति कृतमासनेन । पृच्छामस्तावत्किञ्चित्—

एषा कामिकराङ्गुळिप्रियसखी नाभिह्रदांभःस्रुतिः
विद्युत्क्षौमवलाहकस्य रुचिरा कार्कश्ययोग्यारणिः ।
मौर्वी कामशरासनस्य ललिता वाक् श्रोणिबिंबस्य ते
छिन्ना मानिनि मेखला रतिसुखाभ्यासाक्षमाला कथम् ? ॥

अथवा किमत्र ज्ञेयम्—

विस्रंभाच्च हृतांशुकस्य शयने प्रीत्येक्षितस्य प्रिये-
णोन्मत्त(न्मुक्त) द्विरदेंद्रमस्तकवपुर्लीलोदयालम्बिनः ।
स्पर्शावाप्तिकुतूहलस्य जघनस्यावल्गतस्ते ध्रुवं
तन्त्रीछेद इवाकरोद्विरसतां ताम्राक्षि काञ्चीपथः ॥

कथमधोमुखी स्थिता । कथं नास्ति प्रतिवचनम् । इदं गम्यते । किं ब्रवीषि— "न गन्तव्यं" इति । हन्त ! एषाऽस्मि म-

न्त्रावरुद्ध इव भुजंगमोऽजंगमः संवृत्तः । कथं व्रजामि । एष ध्वस्तोऽस्मि । (परिक्रम्य, कर्णं दत्त्वा) अये रामदासीगृहे स्त्रीप्ररुदितमिव । इह खलु बहुभिः कारणैरुपपद्यते । तत्र केन खलु कारणेनैषा रोदिति । कुतः—

स्यात् कोपाद्रुदितस्वरः सरभसो दैन्यात्तथा शीफरो
विच्छिन्नः प्रणयाद् भयेन विरसो हर्षोदयाद् गद्गदः ।
मन्ये क्रोधवशंगता प्रणयिनी ह्येषा सदैन्या तथा
प्रारम्भे रभसं विरामबहुलं मन्दं तथा रोदिति ॥

आशङ्कते रामदासीमेव मे हृदयम् । प्रविशामस्तावत् । (प्रविष्टकेन) सैवेयम् । सैषा मां दृष्ट्वा भृशतरं प्ररुदिता ।

अस्या नेत्रान्तविभ्रष्टाः कोपसर्वस्वसंभृताः ।
प्रियापराधगणनां कुर्वन्तीवाश्रुबिन्दवः ॥

(उपेत्य) मानिनि किमिदम्—

आपूर्याभिनवाम्बुजद्युतिहरे नेत्रे प्रयातोऽधरं
तद्भ्रष्टः कठिनौ गतः स्तनतटौ तत्राप्यलब्धास्पदः ।
बाष्पस्ते तनुरोमराजिलुलितः शोकप्रसंगोज्झितः ।
नाभिं पूरयति प्रियाङ्गुलिमुखप्रक्षेपलीलोचिताम् ॥

न खलु कृतमात्मनः सदृशं कुञ्जरकेण । किं ब्रवीषि— "एवं परयुवतिच्चिह्नितोष्ठो मा मभिगतः, उपालभ्यमानश्च मया रोषच्छलेन निर्गतः, अद्य बहून्यहानि नावर्तत" इति । हृ हृ हृ ! अहो अपराधसंमर्दः । सर्वथा एकेनाप्यपराधकारणेन तक्षिणं कुलोत्सादनकरं दण्डमर्हति, किं पुनरेतेषां सन्निपातेन । तदेवमपि तु गते बद्धमेवयूथं

कालमवेक्ष्य सहामहे दुर्जनस्यावलेपम् । संप्रति पार्थिवानामपि तावदन्योन्यबद्धवैराणां प्रतिनिवृत्ताः कलहाः । किं पुनः शिरीषकुसुमसुकुमारचित्तस्य कामिनीजनस्य । यदि ते मद्वचनं प्रमाणं भवति कालमवलोक्याद्यैव प्रियोऽभिसारयितव्यः ।

शर्वर्यामवगाह्य हर्म्यशिखराल्लग्नावलंबांबुदा-
न्मार्गे भीरु गृहप्रणालिसलिलोद्गारस्वनापूरितम् ।
कान्तं प्राप्य ततः पयोदपवनैरुद्वेपिताङ्ग्या त्वया
वक्त्रोष्मापहृतोष्ठकम्पविशदं रत्यन्तरे कथ्यताम् ॥

कथमुद्भिन्नरोमाञ्चौ कपोलतलौ वचनस्य नः प्रतिग्रहं निवेदयतः । साधयामस्तावत् । (परिक्रम्य).

अये एषा खलु सा रतिसेना गर्भगृहावरोधजनितस्वेदबिन्दुसेकेनार्धोन्मीलितचारुनयनाविप्रेक्षितेन कपोलपार्श्वेलग्नमूर्धजेन मुखेन नूनं सावशेषमदा सांप्रतमेव प्रतिबुद्धा । तथा हि गवाक्षमारुतस्यात्मानमुपनयति । रमणीयायां खल्ववस्थायां वर्तते । अभिभाषिष्ये तावदेनाम् । (अभिगम्य) वासु सुभगा भव । त्वां ह्यल्पावशेषमदां सावशेषसन्ध्यारागमिव प्रतीचीं दृष्ट्वा दिशं प्रस्रस्तशरासनः कुसुमायुधोऽपि तावद्व्याकुलतां गच्छेत् । किमङ्ग पुनरन्यः ।

प्रणष्टा न व्यक्तिर्भवति वचसः सैव मृदुता
न रागो नेत्राब्जे त्यजति न च लज्जा व्यपगता ।
स्मृतिः प्रत्यायाता परिहृषितमद्यापि च मुखं
मदो दोषाँ स्त्यक्त्वा त्वयि परिणतस्तिष्ठति गुणैः ॥

रतिसेने विसर्जयितुमर्हति भवती माम् । नाहं प्रारम्भस्त्वां मोक्तुमुत्सहे । कथं प्रहस्यावघाटितो गवाक्षः । हन्त ! विसृष्टाः

सः । (परिक्रम्य) हन्त ! विमनाः खल्वस्मि अतिक्रान्तः । इयं हि प्रद्युम्नदासी प्रसक्तसुरतग्लानकपोलेनायायतनयनसञ्चारेण तिलकावभेदपिञ्जरीकृतललाटोद्देशेन विलुलितालकशोभिना लग्नमिव रतिपरिश्रममुद्वहता वदनेन जघनबिम्बांशुकान्तरदृश्यमानाभिरभिनवनखक्षतराजिभिर्विमलसलिलान्तर्गताभिरिव फुल्लाशोकच्छायाभिः सुरतावमर्दमृदितमण्डना अवसितसमरशिथिलाकल्पेव नागवधूः प्रवातदीपमिव पाणिना प्रच्छाद्याधरोष्ठं अनुयातकिशोरीव पदात्पदशतं गच्छन्ती वेशमार्गमलङ्कुरुते । दृष्टा नः कामिनी । परिहसिष्यामस्तावदेनां (उपेत्य) वासु किमिदं प्रियदशनपदाधिष्ठितस्य दशनवसनस्य सव्रणस्येव योधस्य श्लाघ्यं वपुश्छाद्यते । कथं प्रहसिता । हा धिक्कृत एव नः पौरोभाग्येन दोषः । अस्या हि । मन्दारम्भेणापि प्रहसितेन विकृतमेव दन्तक्षतेषु । कुतः—

सीत्कारोत्पतितस्तनी स्तनतटोत्क्षेपातिनिम्नोदरी
भ्रूभेदाञ्चितलोचना क्षतरुजाधूताग्रहस्तांबुजा ।
यद्यन्यापि समाक्षिपेज्जनमनांस्येवं प्रहस्याङ्गना
कामिन्या हसितव्यमेव तु भवेद्दष्टाधरोष्ठे मुखे ॥

किं ब्रवीषि— "चिरस्य खलु भावो दृश्यत" इति । अनेन दुर्दिनपातकेन गृहबन्धनेऽस्मिन्निरुद्धः कृतः । अथ भवत्या कोऽनुगृहीतः ? किमाह भवती "रामिलकस्योदवासितादागच्छामि" इति । सदृशः संयोगः स्थावरोऽस्तु । अहो ? एकेन खलु रामिलकेन मदनाप्रहारो हृतः । कुतः—

सफलं तस्य कृशोदरि युवत्वमसमस्तविहसितं यस्ते ।
सार्धशशाङ्कच्छायं चषकमिव मुखं समापिबति ॥

वासु दुर्विहगेभ्यो रक्षितव्योऽधरः । गम्यताम् । साधयामो

वयमपि । (परिक्रम्य) अये इदं तद्ध्वनीकभयात् कुंभकर्णवदनमिव नित्यनिमीलितभवनद्वारं यत्र धूर्तद्वयं प्रतिवसति विश्वलकः सुनन्दा च । विश्वलको हि भक्षितसर्वस्वो नग्नश्रमणक इव शरीरमात्रावशिष्टः केवलं प्रियगणिकत्वादागतकोशोपद्रवामपि सुनन्दां वायस इव ग्रामोपान्तं न मुञ्चति । सापि चात्र प्रोषितयौवना कान्तारशुष्कनदीव कस्यचिदनभिगम्या विश्वलकं किलानुवर्तते । तन्नयुक्तमेतद्द्वन्द्वमनभिभाष्यातिक्रमितुम् । अयमाक्रन्दः क्रियते । कोऽत्र भवते ? (कर्णं दत्वा) भोः प्रयातस्येवाश्वस्य खुरपुटनिपातध्वनिः पादोत्क्षेपसमये काष्ठपादुकाशब्दः श्रूयते । सन्निहितेनात्र विश्वलकेन भवितव्यम् । हन्त ! स एवैष विरौति । भोः किं ब्रवीषि— "क एष गर्दभव्रतमनुतिष्ठति" इति । अहं यमदूतः सुनन्दार्थमागतः । कथमस्मत्स्वरमभिज्ञाय तूष्णींभूतः । अघो न प्रयच्छासि द्वारम् । तेन हि स्थिरीक्रियतामात्मा । एष शापाग्नि मुत्सृजामि ।

लीलोद्यतस्य कलहे नूपुरसंक्षोभनिनदमुखरस्य ।
दूरीभवतु शिरस्ते विलासिनीवामपादस्य ॥

एतदपावृतद्वारम् । प्रविशामस्तावत् । (प्रविष्टकेन)

किमाह भवान् —"किं न दयिताः स्मो भावस्य; युक्तं नामेदृशं शापोत्सर्गं कर्तुं" इति । सम्यगभिहितम् । ईदृशो हि शापो ब्रह्मलोकमपि कंपयेत् । किं पुनर्भवन्तम् । तदिदानीमस्य शापस्य प्रतीकारार्थं प्रायश्चित्तम् । कुतः—

विकचनवोत्पलतिलका ससंभ्रमोत्क्षेपचञ्चलतरङ्गा ।
तस्यै देया मदिरा या हृदयकुटुम्बिनी भवतः ॥

एवमुपविशामः । (उपविश्य) कृतं पाद्येन । कुसुमपुरराजमार्गो

हि निष्पङ्कतया हर्म्यतलान्यप्यतिशेते । न खलु मे पादौ दुर्ललितौ कर्तव्यौ । किमाह भवान्—"विष्णुदासप्रभृतीनां गोष्ठिकानां दामिलकगोष्ठके समागतानां परस्परविवादरम्याः केचित्संशयाः प्रवृत्ताः कामतन्त्रे । तांश्च यदा कार्त्स्न्येन न शक्नुवन्ति वक्तुं ततोऽस्म्यहं तैरात्मदर्शनं श्रावयितुमभ्यर्थितः । तत्र मयापि स्वदर्शनमुक्तम् । इच्छेयं तावद्देविलकभावमपि तमेवार्थं श्रावयितुम् । तत्र यद्भावो वक्ष्यति तन्नः प्रमाणं भविष्यति । एतमर्थं भवन्तं श्रावयितुं गृहमेवागन्तुमनाः । अथ भावेन स्वयमेवात्मा दर्शितः । यदि तावद्भावः क्षणिकः ततः प्रवक्ष्यामि" इति । आज्ञापयतु भवान् । अवहितोऽस्मि । शक्तितो वक्ष्यामः । अयन्तु दुर्ललित इव दारकः कुटीप्रदेशं न मुञ्चति वायुः । अतश्चिराध्यासं न शक्नोमि कर्तुम् । यद्यभिरुचितं भवते परिक्रान्तावेव संभाषिष्यावहे । विस्तीर्णेयं गोष्ठीशाला । किं ब्रवीषि—"एवं नास्ति दोषः" इति । (उत्थाय) ब्रवीतु भवान् । किं ब्रवीषि—"यद्यर्थमेव वेश्यानां पुरुषैः सह संबन्धः कथं तासामुत्तमाधममध्यमत्वं विज्ञेयं" इति । भोः दानं नाम सर्वसामान्यं वशीकरणं लोकस्य, विशेषतस्तु वेशवधूनाम् । तथापि विद्यते विशेषः । कुतः ? अपि चोक्तं परापरज्ञैः—

दानाद्रागमुपैति वेशयुवतिर्निष्कारणाद्राधमा
मध्या रूपमवेक्ष्य यौवनयुतं दानेन वा हृष्यति ।
दातारं विगतस्पृहं सुवयसं रूपाधिकं चैव भो
दाक्षिण्येन विभूषितं खलु नरं नार्युत्तमा सेवते ॥

किं ब्रवीषि—"कामयमाना वेश्या कथं विज्ञायेत" इति । तद्वक्ष्यामः, श्रूयताम्—

कान्ता नेत्रार्धपाता वदनरुचिकराः सस्मिता भ्रूविलासाः
साकारा वाक्यलेशाः सहतलनिनदा दृष्टनष्टाश्च हासाः ।

नाभीकक्षस्तनानां विवरणमसकृत्स्पर्शनं मेखलानां
श्वासायासाश्च दीर्घा मदनशरहतां कामिनीं सूचयन्ति ।

किं ब्रवीषि— "तत्र कामलिङ्गानि बहूनि ब्रुवते 'शठप्रायत्वाद्वेश्याजनस्य निष्ठोचिततत्वात् ? क एतच्छाद्धास्यन्तीति' तत्कामयमाना कथं विज्ञेया" इति । श्रूयताम्—

सास्रा निश्वासाः स्नेहयुक्ता च दृष्टिः
कार्श्यं पाण्डुत्वं स्वेदबिन्दूद्गमश्च ।
क्षीणे द्रव्येऽपि प्रार्थना कामिनीनां
भावासक्तानां भावशुद्धिं वदन्ति ॥

(परिक्रम्य) किं ब्रवीषि— "प्रथमः समागमः केन कारणेन संमोहमुत्पादयति" इति । श्रूयताम्— प्रथमसमागमः खलु कामिनीना मनियोगस्थानम । तत्स्थाने खलु मह्यन्ति तपस्विनः, कुतः—

दुःखा श्लेषयितुं कथा प्रतिवचो लब्धुं च दुःखं ततो
जातेऽपि प्रचुरे कथाव्यतिकरे विस्रम्भणं दुष्करम् ।
विस्रम्भेऽपि सति स्वभावसदृशी दुःखा विधातुं रतिः
सम्यक्प्राप्तरतापि वेशयुवती रज्येत वा नैव वा ॥

किं ब्रवीषि— "केन कारणेन निर्गुणास्वपि दर्शनमात्रकेणैव स्नेहो भवति । तासु च व्यलीकमुत्पादयन्तीषु किं प्रतिपत्तव्यम्" इति । प्रत्यक्षे हेतुवचनं निरर्थकम् । अस्त्येतन्महदवकाशमनङ्गस्य—यासु तु निर्गुणास्वपि रज्यन्ते मनुष्यास्तासु व्यलीकमुत्पादयन्त्यः शीघ्रमेव परित्याज्याः । कुतः—

प्रियविरहे यद्दुःखं सह्यं तद्भवति सत्वयुक्तस्य ।
प्रियजनविमानितानां न रोहति परिक्षतं हृदयम् ॥

किमाह भवान्— "यस्तु नार्योः प्रियो भवति तस्य सा नातिबहुमान्या प्रिया भवति । सापि किं परित्याज्या" इति । न न न । अन्यास्वपि कामिनीष्वायतिं रक्षता स्वच्च दाक्षिण्यमदूषयता तस्यामपि तस्मिंस्तस्मिन् काले रक्तवद्विचेष्टितव्यम् । कुतः—

ये कामिनीं गुणवतीं च सयौवनाश्च
नारीं नराः प्रणयिनीश्च विमानयन्ति ।
ते भोः कृषीवलवचःपरिदग्धचित्तै-
र्गोभिः समं पृथुमुखेषु हलेषु योज्याः ॥

(परिक्रम्य) किं ब्रवीषि— "यस्तु कृतापराधस्तेन कथं कामिनी समनुनेया" इति । स्थाने खलु संशयः । प्रणयिनीनां हि कोपो विषमज्वर इव दुश्चिकित्सः । तथाप्यवश्यमस्याः कोपप्रत्यावर्तकेन भवितव्यम् । सांप्रतकालिकाश्च कामुकाः पादपतनमेवात्रौषधं पश्यन्ति । तन्मया नातिबहुमन्यते । यदा च वृद्धश्रोत्रियाणामपि तत्तात्कठिनकूणितवृद्धकर्कटाकृतयः पादुकाकिणकर्कशाः पुराणघृताभ्यक्तदुर्गन्धाः पादा गृह्यन्ते । कोऽत्राभिमानः पल्लवसुकुमारेषु कामिनीनां पादेषु । अपि च तत्तु दोषवत् । कुतः— पादग्रहणेऽवश्यं बाष्पः संजायते प्रणयिनीनामश्रुविमोक्षे दैन्यं दैन्योत्पत्तौ कुतः कामः । अन्ये तु ब्रुवते— 'शपथकरणैरनुनेया' इति । तदप्यश्लिष्टम् । कुलवध्वोऽपि तावत्कामुकानां शपथं न श्रद्दधति । किंपुनर्वेश्याः ; या वा श्रद्दध्यात् तया किमनुनेतव्यया भवितव्यम् । उक्तं च—

"ग्रामे वासः श्रोत्रियकथनं परतन्त्रता कृपणभावः ।
आर्जवयुता च नारी पुंसां मदनान्तकारिणः केचित्" ॥

केचिद् ब्रुवते— 'येन केनचिदुपायेन हासयितव्या । हासान्तरि-

तथैर्याभिज्ञातगाधेव नदी सुखावगाह्या भवति' इति । अत्र ब्रूमः । यद्यप्यस्त्येतत् तथापि कोपफलं नावाप्तं भवति । कुतः—

उत्कृष्यालम्बमीषत्प्रतनुनिवसनं नर्तयित्वाधरोष्ठं
तत्कालश्रोत्ररम्यं परुषमपरुषैरक्षरैः श्रावयित्वा ।
यत्कोपाद्वामपादं नवनलिननिभं निक्षिपत्युत्तमाङ्गे
तच्छ्लाघ्यं यौवनाढ्यं रतिकलहफलं प्राप्तकामा वदन्ति ॥

तस्माद्धास्यप्रयोगेणापि मानयितव्यः स्त्रीकोपः । एवमस्तु । विमृश्यमानेषु स्त्रीणां कोपप्रसादनोपायेषु सद्यो दृष्टफलत्वादवमृश्य चुंबनमेवास्माकं पक्षः । कुतः—

केशेषूत्कटधूपवाससुरभिष्वासज्य वामं करं
हस्तौ द्वावपि दक्षिणेन सहितौ संगृह्य नात्यायतम् ।
यो हर्षः पिबतो बलात्प्रियतमावक्त्रेन्दुमुत्पद्यते
तेनाप्यायितमन्मथो हि पुरुषो जीर्णोऽपि न क्षीयते ॥

किं ब्रवीषि— "यस्तु प्रमाददोषात्प्रियायाः समक्षमेव गोत्रं स्खलयति तस्य भावः किं प्रतीकारं पश्यति" इति । भोः अन्यस्त्रीगोत्रग्रहणं हि महानुपप्लवः कामुकानाम् । आशीविषदष्टस्येवास्य दुःखा प्रतिक्रिया कर्तुम् । मुहूर्तं नाम ध्यानं प्रवेक्ष्यामः । (ध्यात्वा) आ ! दृष्टम्—

धाष्ट्यत्सर्वापहारः परिशठमथवा त्रस्तवन्निष्क्रियत्वं
नार्या वाक्यप्रशंसा त्वरिततरमथो हास्यपक्षक्रिया वा ।
अन्यस्मिन्वा प्रयोगो वचसि यदि भवेत्तस्यचान्येन योगो
नानागोत्रग्रहो वा भवति हि शरणं गोत्रवाक्यक्षतस्य ॥

किं ब्रवीषि— नखदशननिपाताः केन कारणेन सवेदना अपि

प्रीतिमुत्पादयन्ति" इति । ह ह ह ! अतिमुग्धमभिहितम् । पश्यतु भवान्— नखदशननिपाताः सवेदना अपि प्रीतिमद्भ्यां सुखमुत्पादयन्ति । कुतः—

यथा प्रतोदोऽप्यहितं करोति अश्वे हये सारथिसंप्रयुक्तः ।
तथा रतौ दन्तनखावपातः स्पर्शैकतानं हृदयं करोति ॥

(परिक्रम्य) किं ब्रवीषि—"कथं वेश्या विरक्ता रक्तेव चेष्टमाना विज्ञेया" इति । अथ भोः कोऽत्र संशयः । एष एवोपदेशः— अनुरक्तायां रागो भावयितव्यः । यथा चोपदिष्टम् । पश्यतु भवान् । आकारसंवरणं हि महात्मानो न शक्नुवन्ति कर्तुम् । किं पुनरकठिनहृदयाः स्वल्पावगताः स्त्रियः । कुतः— आकार एवावेक्षितव्यः । किं ब्रवीषि— "कथं" इति ।

व्यर्थं प्रश्नयते तदन्यकथिते सावेगमुत्तिष्ठति
मोक्तुं न प्रतिबुध्यते न कुरुते स्त्रीस्वोचितां वामताम् ।
गाढं प्रत्युपगूह्य मुञ्चति मुहुः खिन्ना नियुक्ते रतौ
रागान्ते निपुणेऽपि वन्ध्यकुसुमा ज्ञेया लतेवाङ्गना ॥

किं ब्रवीषि— "विरागं समुत्पन्नं कथं चिकित्सितुं शक्यं उताहो अप्रतीकार एवैष भावः" इति । शृणोतु भवान्— रागोत्पत्तिः खलु द्विविधैव भवति कारणादकारणाद्वा । तत्र कारणोत्पन्नस्य रागस्य कारणादेव विरागो भवति । एवमकारणोत्पन्नस्याकारणादेव । एवं रागविरागयोर्वैषम्ये किमिव शक्या प्रतिक्रिया कर्तुम् । मन्दीभूते तु रागे या प्रतिक्रिया तां वक्ष्यामः—

अन्यस्त्रीसेवनं वा रतिविकृतिरथो धीरता विग्रहो वा
क्षान्तिः काले सहास्या वचननिपुणता बन्धुपूजा स्तुतिर्वा ।

केळयाव्याजप्रवासः पुरवरगमनं साहसोपक्रमो वा
दानं वा कामिनीनां परिचयशिथिलं रागमुद्दीपयन्ति ॥

अपि च, शृणोतु भवान्—

बाला बालत्वाद् द्रव्यलुब्धा प्रदानैः
प्राज्ञा प्राज्ञत्वात्कोपना सान्त्वनाभिः ।
स्तब्धा सेवाभिर्दक्षिणा दक्षिणत्वात्
नारी संसेव्या या यथा सा तथैव ॥

(परिक्रम्य) किं ब्रवीषि—

"दर्शयति कामलिङ्गम्न वदत्यलमिति न गच्छति समीपम् ।
या स्त्री विहरति काले सा कर्तव्या कथं वश्या" ॥ इति

साध्वभिहितमेतत् । प्रथमं तावत्कामिना ज्ञेयः स्त्रीस्वभावः । एष एव स्त्रीस्वभावः स्यात् । किन्तु यावज्जीवितमपि गर्विता निरुपायं न शक्या वशमुपनेतुम् । यत्तु स्त्रीणां रहस्यं तदिदमुद्धाट्यते ।

शून्ये वा संप्रमर्द्य द्विरद इव लतां यो हरत्याशु नारीं
मत्तां वा यो विदित्वा ह्यभिभवति शनै रञ्जयन्वाक्यलेशैः ।
अन्यं कृत्वोपधिं वा च्छलयति कुरुते भावसंगूहनं वा
तस्यैतच्चेष्टितं भो न भवति विफलं वामशीला हि नार्यः ॥

(परिक्रम्य) किं ब्रवीषि—

"गते तु कोपे प्रथमे समागमे
प्रवासकाले पुनरागमे तथा ।
वदन्ति चत्वारि रतानि कामुकाः
ततो भवान् किन्त्वधिकं व्यवस्यति" ॥ इति ।

अत्र ब्रूमः—यत्तावत्प्रथमसमागमे रतं तदप्यलब्धविस्रम्भायां कामिन्यामज्ञातगाधमिव सरः शङ्कावगाहं भवति । यदपि प्रवासकाले रतं तदपि तच्छोकाभिभूतत्वान्मन्दरागायाः सास्राविलाक्षमुपोह्यमानहृदयोद्वेगक(का)रणं रम्यं (अरम्यं) करुणं ग्रहोपसृष्टं चन्द्रमण्डलमिव न मां प्रीणयति । यदपि प्रवासादागते रतं तदप्यकृतप्रतिकर्मतया प्रियया व्रीळितया व्यंजितं दुर्दिनगान्धर्वमिव मन्दरागं भवति । यत्पुनः कोपापगमादागतं तत् सुरासुरावि[द्ध]मन्दरपीडिते सर्वौषधिप्रक्षेपाप्यायितवीर्ये भगवति सलिलनिधौ यदुत्पन्नममृतसंज्ञकं किमपि श्रूयते आयुर्वयोऽवस्थापनं रसायनं तदप्यतिवर्तते । कुतः—

कोपापगमे नार्यास्तमेव हृदयेन भावमजहन्त्याः ।
सुरतमतिरभसमनिभृतकररुहदशनपदजर्जरं भवति ॥

(परिक्रम्य) किं ब्रवीषि—"वेश्यावञ्चितं पुरुषं परिहसन्ति धूर्ताः । कथं वेश्यावञ्चनं न प्राप्नुयात् कामुकः" इति । भो वेश्या लिपिकारश्च छिद्रप्रहारित्वात् तुल्यमुभयम् । तत्र लिपिकारोऽप्यास्ते हस्तगतकल्पं कृत्वा मुहूर्तमवस्थानं प्रापयति । वेश्या पुनर्वातरोग इवात्यर्थव्ययमुत्पादयति । यदि मच्चरितानुगामी भवेत् तेन वेशः प्रवेष्टव्यः । मया हि—

विस्रंभो गतयौवनासु न कृतो बालाः परीक्ष्य स्थितं
दूरादेव समातृकाः परिहृता नद्यः ससत्वा इव ।
मन्युर्नास्ति विमानितस्य न पुनः संप्रार्थितस्यादरो-
वेशे चास्मि जराङ्कितो न च कृतः स्वल्पोऽपि मिथ्याव्ययः ॥

(परिक्रम्य) किं ब्रवीषि—"नार्योर्युगपदागमे का प्रतिपत्तव्या का परित्याज्या कालवर्धितप्रणयिनी उताहो नवप्रणयिनी ? एवं प्र-

श्नं वदतु भावः" इति । कष्टः खल्वयं प्रश्नः । दुर्वचो मा प्रतिभाति । किमत्र भवान् पश्यति ? किमाह भवान्—"न किञ्चिदप्यत्र पश्यामि । महत्त्वेतत्सङ्कटम् । भाव एव वक्तुमर्हति" इति । तेन हि श्रूयताम्—

रूढस्नेहान्न युक्तं नवयुवतिकृते स्वां प्रियां विप्रमोक्तुं
तत्प्रीत्यर्थं न हेया स्वयमभिपतिता कामिनी जातकामा ।
तत्रोपेक्षैव कार्या व्रजति परिचिता यावदुद्भूतकोपा
शून्ये प्राप्य द्वितीयामथ तदनुमते संप्रसाद्या प्रियैव ॥

(परिक्रम्य) किं ब्रवीषि—"वेशे सञ्चरता दर्शनमात्रकेणैव कथं शक्यं ज्ञातुं स्त्रीणां रहोनैपुणं" इति । नास्ति किञ्चिन्निपुणस्याज्ञेयम् । स्त्रियं खलु दृष्ट्वा पुरुषेणैव दृष्टिरेव प्रथमं परीक्ष्या भवति । चक्षुषि हि सर्वे भावा नियताः । पश्यतु भवान्—

सकेकरा मन्दनिमेषयुक्ता तिर्यग्गता स्नेहवती विशाला ।
दैन्येन हीना चलतारका च स्त्रीणां रहोनैपुणमाह दृष्टिः ॥

अपि च, यस्याश्चाभुग्नमषित्प्रतनुकपोलं भ्रूसञ्चारि तिर्यक्कटाक्षमाननं तस्या रतिकार्कश्यं यस्यास्ताश्याम(न)मूलोऽधरः सदन्तनखपदं शरीरं प्रविरलहासितञ्च मुखं तस्या निर्विशङ्कमेव रतिशौण्डीर्यमवगन्तव्यम् । यां वा भवान् पश्यति कटिप्रदेशविन्यस्तवामहस्तां प्रलम्बदक्षिणकरामेकपार्श्वोन्नतजघनां तस्यामप्यास्था कार्या । नह्येवमगर्विता तिष्ठति । याञ्च निवसनान्तावृतैकपयोधरां स्वगृहदेहळीविलग्नैकरुचिरचरणां द्वारबाह्यावरुद्धशरीरां पश्यति स खलु स्त्रीमयः पाशः । चारुलीलात्वमेवास्याः सर्वं कथयति । या वा कवाटगोस्तनतटकमालम्ब्य प्रकटीकृतबाहुपाशा शिथिलीकृतनीवीबन्धना सन्दर्शितनाभिहृदा दृश्यते तस्या माकृतिरतिपूर्वरंगाया मननुमेयं न वि-

यते । शक्यमत्र बह्वपि वक्तुम् । संक्षेपस्तु श्रूयताम्—

यस्यास्ताम्रतलाङ्गुलिः शुचिनखो गण्डान्तसेवी करो
वाणी साभिनया गतिः सललिता प्रस्पन्दितोष्ठं स्मितम् ।
लोला दृष्टिरशङ्कितं मुखमधोनाभेश्च नीवीक्रिया
तां विद्यान्नरवागुरां रतिरणे प्राप्ताग्र्यशौर्यां स्त्रियम् ॥

(परिक्रम्य) किं ब्रवीषि— "द्विविधमेव स्त्रीणां कामितं भवति प्रकाशं प्रच्छन्नञ्च । तयोः कतरद्व्यतिरिच्यत" इति । भोः यत्प्रकाशं तद्वेशवधूष्वेवोपपद्यते । कृतकमपिचैतद्भवति । यत्त्विदं प्रच्छन्नं तत्कुलवधूषु वेशवधूषु च । यत्केवलमनुरागादुत्पद्यते विशेषतश्चैतदल्पदोषत्वाद्वेश्यावधूष्वेव रम्यं भवति । दुर्लभत्वादपि पुरुषाणां कुलवध्वस्तु यं कञ्चित्कामयन्ते । वेश्यया तु न सर्वः काम्यते । स्यान्मतं कस्यचित्— 'निर्दोषमदनत्वाद्वेश्यानां प्रच्छन्नकामितेन किं प्रयोजनं' इति । अत्र ब्रूमः— पूर्वसंस्तुतो राजवल्लभः कृतोपकारो भक्तिमाननृशंस इत्येते वेश्याजननीसेवकाः । एतेषामवश्यमकामयमानापि वेश्यानुविधेया भवति । किन्निमित्तं ? प्रयोजनार्थमिति । तस्माद्वेश्यया प्रच्छन्नमदनार्थिन्या यः काम्यते तेन जन्मजीवितयोः फलमवाप्तं भवति । किञ्चान्यत् यत्तावद्विरहमासाद्य स्वयं दूतीनां प्राञ्जलिपुरस्सराणि सबाष्पगद्गदानि वाक्यानि श्रूयन्ते ननु तान्येव तस्य पर्याप्तानि भवन्ति । या वा तध्यानपरा रोगव्यपदेशेन गता पाण्डुभावं चन्द्रोदये रोदिति प्रजागराभिताम्रनयना कामिनी शिथिलीकृतभूषणा 'दिष्ट्या त्वदर्थमेव निर्घृण शरीरस्येयमवस्था, भद्रं तवास्तु' इति स्वयमुपालभमानायाः, कान्त याचे त्वा दयस्व मे शरीरस्येति सीत्कारानुबद्धाक्षराणि शृण्वतः त्वरस्व मा मैवं इति दशनकररुहैर्विचोद्य रदमानाया अहमेवं विधा श्रद्दधातु भवान् मया च शापित इत्येवं चोक्तानि रसायनप्रयोगातिवर्तकानि वचांसि चिन्तयतो म-

दर्थमेवेयमीदृशी संवृत्तेति कारणतो दूतीवचनाच्चोपलभ्य पुरुषस्य कारुण्यमिश्रा या प्रीतिरुत्पाद्यते तत्सदृशीं यदन्यां ब्रूयात् विटभावामिमं परित्यज्य श्रोत्रियैः समतां गच्छेयम् । अपि च,

हस्तालम्बितमेखलां मृदुपदन्यासावभुग्नोदरीं
लब्ध्वापि क्षणमागतां समदनां सङ्केतमेकां निशि ।
यो नारीं स्थित एव चुम्बति मुखे भीताश्चलाक्षीं प्रियां
तस्येदं स्वभुजात्तपङ्कजमयं छत्रं मया धार्यते ।' अपि च,

त्वरस्व कान्तेति भयाद् ब्रवीति यं कामिनी चोरितसंप्रयोगा ।
क्रीतास्तया तस्य भवन्ति पुंसः प्राणा यथेष्टं परिकल्प्य मूल्यम् ॥

(परिक्रम्य) किं ब्रवीषि— "रूपवती च स्त्री दक्षिणा चेति तयोः कस्यां प्रीतिविशेषं भावः पश्यति" इति । उभयमेतत्स्त्रियं भूषयति । यत्तावद्विरूपायां दाक्षिण्यं तदन्धकारनृत्तमिव व्यर्थं भवति । रूपमपि दाक्षिण्यहीनमटवीचन्द्रोदयइव कां प्रीतिं करिष्यति । मां प्रतिरूपाद्दाक्षिण्यं भवति प्रधानम् । कुतः ? दाक्षिण्यं विरूपामपि स्त्रियं भूषयति सुरूपामप्यदाक्षिण्यं दूषयति । दृश्यन्ते हि पुरुषाः सुरूपा अपि स्त्रियः परित्यज्य विरूपास्वपि दक्षिणासु रज्यमानाः । रूपवत्या चावश्यं स्तब्धया भावेतव्यम् । स्तब्धता च कामस्य महान् शत्रुः । अनुवृत्तिर्हि कामे मूलम् । सा च दाक्षिण्यात्संभवति । यदि रूपमात्रं कारणं स्याच्चित्रनार्यामपि प्रयोजनं निर्वर्तयेत् । दाक्षिण्य एव रूपगुणं हित्वा सर्व एव गुणसमुदायोऽन्तर्भूतः । कुतः—

सुवाक् सुवेषा निभृता गुणज्ञा भावान्विता नापि च दीर्घकोपा ।
अलोलुपा छन्दकरी च नित्यं दाक्षिण्ययुक्ता भवती च नारी ॥

किमाह भवान्— "वेश्याः कतकोपचरित्वात्सतामनभिगम्या भवन्तीति ब्रुवन्ति । तत्कथं" ? इति । इह खलु काम्यैर्विशेषैरुप-

चरणमुपचारः । एतच्च स्वभावतो नार्या द्वे च लभ्येते । वेश्यायां क्रियानिष्पत्तेः (?) । स्यान्मतं—यच्छाठ्यादुपचर्यते तत्कृतकमिति तदप्य दोषः । कुतः ? शाठ्यादप्युपचारः प्रयुक्तः प्रीतिमुत्पादयति । आर्जवादप्युपचारः स्खलीकृतः कस्य प्रीतिं जनयति ? शाठ्यं नामार्थनिवर्तको बुद्धिविशेषः । आत्मार्थप्रधानया च स्त्रिया पुरुषविशेषोऽवश्यं मृगयितव्यः । या च पुरुषविशेषज्ञा स्त्री तस्यां रज्यन्ते पुरुषाः । अपि च,

नीचैर्भावः प्रियवचनताक्षमा नित्यमप्रमादश्च ।
शाठ्यादुत्पद्यन्ते केनैतद् दृष्यते लोके ॥

किं ब्रवीषि—"विसंवादितं हि शठायाः सारम् ? । विसंवादितस्य कामिनः प्रियया दुःखमुत्पद्यते । नास्ति तस्य प्रतिक्रिया" इति । भोः सर्वं खलु कारणमभिसमीक्ष्य विसंवाद्यते । यस्तु न शक्नोति तत्कारणं परिहर्तुं ननु तस्यैव सोऽपराधः । अनैकान्तिकश्च विसंवादने दोषः । दृश्यन्ते बहवो विसंवादिता भृशतरमनुरज्यमानाः ।

आवल्गितस्तनतटानि च बाष्पमिश्रा
भावाभिधानपटवश्च कटाक्षपाताः ।
अव्यक्तशोभितपदाश्च भवन्ति वाचः
शाठ्यात्सतोऽपि गुणवत्परिकल्पयन्ति ॥ ?

किं ब्रवीषि— "वेश्याभ्यो यद्दीयते तन्नष्टं इति बहवो ब्रुवन्ति । दत्तकेनाप्युक्तं 'कामोऽर्थनाशः पुंसां' इति । तत्र भावः किं पश्यति" इति । भोः अर्थस्य त्रय एव विधयः—दानमुपभोगो निधानमिति । तत्र दानोपभोगौ प्रधानौ निधानन्तु गर्हितम् । कुतः—

निधौ कृतेऽर्थे न हि विद्यते फलं भवत्यतुष्टिर्विफलीकृते पुनः ।
ततो निधानं हि न युक्तमागतं स्फुरत्तुरङ्गस्य जवोपमं धनम् ॥

अर्थधर्मौ शरीरसुखमुत्पादयतः । तत्रेष्टानां शब्दादीनामवाप्तिः सुखमित्युच्यते । तच्च वेश्याजनमुपसेवमानो यथावत्प्राप्नोति । सर्वशब्देषु तावद्विशेषतः प्रियवचनं निर्वृतिकरं भवति । तच्च वेश्याजनो ब्रवीति । न तथान्यः । कथमिव--

प्रियं प्रियार्थं कटुवा प्रियार्थं वदन्ति काले च मितश्च वेश्याः ।
वदन्ति दाक्षिण्यधनाः कदाचिन्नैवाप्रियं न प्रियमप्रियार्थम् ॥

यस्यानिभृतमविषमोरुनितम्बमुद्धृतांशुकमाविद्धमेखलाकलापं वेश्याजघनमभिवाहयतः स्पर्शाः संभवन्ति । किन्न तत्कृते प्राणानपि परित्यजन्ति, किं पुनर्धनम् । सर्वेभ्यश्च रसेभ्यः पानं गर्हितमिव लक्ष्यते तस्यापि वेश्याविशिष्टत्वादुपभोगो रम्यो भवति । पश्यतु भवान्---

ससंभ्रमोद्भूतविघूर्णितां वा पीतावशेषां मुखविच्युतां वा ।
ओष्ठोपदंशां मदिरां निपीतो यो वेशमध्ये सरसं विवेद ॥

येन वार्धनिमीलिताक्षीणि प्रस्पन्दिताधराणि आयतभ्रूलतानि स्विन्नकपोलान्याननानि वेश्याजनस्यावलोकितानि तस्य चक्षुषः फलमवाप्तं भवति । अपि च,---

केशान्तः स्नानरूक्षो विरचितकुसुमः केशहस्तः पृथुर्वा
वस्त्रं वा भुक्तमुक्तं परिमलसुरभिः पद्मताम्रोऽधरो वा ।
वेश्यायास्ताम्रनेत्रं मुखमुदितमदं चन्दनार्द्रा तनुर्वा
येनाघ्रातानि तस्य ध्रुवमभिपतितो घ्राणमार्गेण कामः ॥

न त्वस्माकं धर्मेऽधिकारः । तथापि तु यथा धर्मावाप्तिर्भवति तथा वक्ष्यामः । इह हि कृतघ्नता सर्वपापीयसी । स च ततः कृतघ्नतरः यो वेश्यावधूभ्यः सुखमीप्सितमनुपममवाप्य ताभ्यो न प्र-

त्युपकुरुते । यदि कृतज्ञो भवति तस्य हस्ते स्वर्गः । तस्मात् स्वर्गसुखावाप्त्यर्थं निर्विशङ्केन वेश्याभ्योऽवश्यं वित्तं दातव्यम् । किं ब्रवीषि— "दाक्षिण्ययुक्तायामपि कुलवध्वां केन कारणेन तादृशो न भवति यादृशो वेश्यायां" इति । श्रूयतां—दाक्षिण्यविषयस्तावदन्यः कुलवध्वा मन्य एव वेश्यायाम् । ऋजुस्तु कुलवधूर्यदि तावत् प्रियं वदति अकाले वा वदति अतीव प्रियमिति वा विप्रियं वदति । एवं सर्वत्र । कामश्चेच्छाविशेषः । प्रार्थना चेच्छा । प्रार्थना चासंप्राप्तेरुत्पद्यते । सा च वेश्यायां स्वाधीनप्राप्तायामपि मात्सर्यादुत्पद्यते । बहुसाधारणत्वात् । मात्सर्यश्च लोभं जनयति । तस्माल्लब्धावकाशो वेश्यायां कामो न व्यपैति । काममूलश्च रागः । अपि च—

वेश्याजघनरथस्थः कुलनारीं कः स चेतनो गच्छेत् ।
नहि रथमतीत्य कश्चिद्द्रोयानेन व्रजेत्पुरुषः ॥

किं ब्रवीषि— "लोकस्य वेश्यां प्रतिसक्तो मनुष्यः पूज्यो न भवति । संमतिश्च तस्य नेष्टा । यत्र च गुणा दृश्यन्ते तत्किमर्थं नानुष्ठेयं" इति । अतिविटत्वमभिहितम् । मुहूर्तमवधानं दीयताम् । (ध्यात्वा) इह हि द्विविधा पूजा भवति । फलवत्यफला च । तत्र याफला नम्रस्येव चेष्टितं भवति हास्यम् । वेश्यायामप्रसक्तस्य किं फलमिति । स्यान्मतं 'अयशस्यो वेशप्रसङ्गः' इति । तन्न ग्राह्यम् । सर्वो हि सुखिनं द्वेष्टि लोकः । यथा च परस्त्रियो न गम्या इति प्रतिकण्ठमभिहितं न तथा वेश्याः । स्यान्मतं—'स्त्रीषु प्रसङ्गो न श्रेयान् वेश्याश्च स्त्रियः' इति । अत्र ब्रूमः । न तु स्त्रीष्वायत्तो लोको दूषयितुमर्हति । अपि च,—

प्रागल्भ्यं स्थानशौर्यं वचननिपुणतां सौष्ठवं सत्वदीप्तिं
चित्तज्ञानं प्रमोदं सुरतगुण(वि)धिं रक्तनारीनिवृत्तिम् ।

चित्रादीनां कलानामधिगमनमथो सौख्यमग्र्यञ्च कामी
प्राप्नोत्याश्रित्य वेशं यदि कथमयशस्तस्य लोको ब्रवीति ॥

(परिक्रम्य) किं ब्रवीषि— "यदेतद्बृहस्पत्युशनःप्रभृतिभिरन्यैश्च शास्त्रप्रयोक्तृभिरुपदिश्यते—'स्त्रीषु प्रसंगो न कर्तव्यः' इति अत्र भावः किं पश्यति" इति । भोः उपदेशमात्रं खल्वेतत् । तमहं न पश्यामि यः स्त्रीषु प्रसङ्गं न गच्छेत् । श्रूयन्ते हि— 'महेन्द्रादयोऽप्यहल्याद्यासु विकृतिमापन्नाः' । धर्मार्थयोरपि श्रेष्ठो विषयः । इष्टविषयप्रादुर्भावफलत्वात् । विषयप्रधानाश्च स्त्रियः । यो हि वेश्यां परित्यज्य कामोपभोगान् दिव्यान् कामयते तमप्यहं वञ्चित इत्यवगच्छामि । इहापि तावत्तदात्वायत्योस्तदात्वमेव गरीयः प्रत्यक्षफलत्वात् । किं पुनरन्यस्मिन् देहग्रहणे संशयिते तपश्चरणदुरवापे रमणीये (?) पश्यतु भवान्— जलधरनिर्वापितचन्द्रदीपासु द्विगुणतरतिमिरभीमदर्शनासु शिशिरतरपवनासु सलिलपवनदुःसञ्चारासु जलदकालनीलासु रजनीषु मदनशरसन्तप्तयैकाकिन्या कामिन्याभिसारितस्य पुंसो नूपुरस्वनबोधितस्य जन्मजीवितयोः फलमवाप्तं भवति । किमाह भवान्— "नूपुरधारणं हि महदुपकुरुतेऽभिसारिकाभ्यः" इति । एवमेतत् । कुतः—

प्रथमसमागमनिभृतः कथमात्मनिवेदनं जनः कुर्यात् ।
पादस्पन्दनरभसो यदि न स्यान्नूपुरनिनादः ॥

एवं नूपुरशब्दनिबोधितोऽयं जलधरधाराधौतविशेषकमाप्लुताञ्जनाक्षमनवस्थितोष्ठमाननं समदं पीत्वा यद्यवश्चिरा बहूनि कल्पान्तराणि नरकदुःखान्यनुभवति तथापि तस्य युवतिजनप्रणयप्रतिग्राहिणस्तानि श्लाघ्यानि भवन्ति । विगतजलदावकुण्ठनायां विरचितविमलग्रहपतितिलकायां विगतमारुतायामसनकुसुमवासितादिगन्तरायां शरदि सारसरुतसंवादितमेखलास्वनाभिर्बन्धूककुसुमोज्ज्वलविशेषकाभि-

श्चक्रवाकोपदिष्टानुरागाभिः प्रियाभिः सह येन प्रतिबुद्धपङ्कजदीर्घिकासलिलमवगाढं तस्य किं स्वर्गेण । अथवा कुन्दकुसुममिश्रिते फुल्ललोध्रगन्धाविद्धमारुते प्रियङ्गुमञ्जरीक्लृप्तकेशहस्ते प्राप्ते हेमन्तकाले हिमापराधकातरोष्ठीनामधरोष्ठरक्षणीनामपि चुम्बनविवादिनीनां प्रियाणां प्रणयबलात् मुखान्यापिबतो या प्रीतिरुत्पद्यते तस्या नास्त्यौपम्यम् । अथवा कालागरुधूपदुर्दिनेषु गर्भगृहेषु प्रकीर्णातिमुक्तकुसुमेषु तुषारमुक्तावर्षिणीषु परुषपवनासु शिशिरकालरात्रिषु प्रिययानुरक्तया पीनाभ्यां स्तनाभ्यामवपीड्यमानवक्षा वरशयनतलोपगतो गाढोपगूहनजनितस्वेदबिन्दुसुरभिगात्रो यः सुरतान्तरेषु निद्रामुपसेवते तेन किं नाम नावाप्तं भवति । अपि च,—

अधरोष्ठरक्षणीनां कचग्रहोत्क्षेपचञ्चलाक्षीणाम् ।
पातव्यानि च तृषितैर्मुखानि सीत्कारसहितानि ॥

निद्राविरहिते स्वर्गे किमवाप्यन्ते । अथवा स्वेदबिन्दुलङ्घनावरुद्धतिलकमार्गेषु प्रवृत्तमदनदूतीसंपातेषु संयोज्यमानमणिरशनेषु दृष्टसहकाराङ्कुरेषु सुरभिपवनेषु वसन्तदिवसेष्वविदितागतया स्वयमेव मुक्तमानया यः प्रिययानुरक्तयानुनेतव्ययानुनीयते तेन नान्येषु स्पृहा कर्तव्या । अथापि यो वा शिरीषकुसुमश्यामिळीकृतस्त्रीकपोले सलिलमणिमुक्ताहारचन्दनोशीरव्यजनपवनोपभोगरमणीये प्रचण्डसूर्यकिरणे निदाघकाले कुसुमशयनशायिन्या नवमालिकोन्मीलितकेशहस्तहस्तया चन्दनार्द्रपयोधरया तालवृन्तमारुतेनोपसेव्यमानो मारुतग्राहिण्युदवसिते प्रियया सह मध्याह्नमतिवाहयति । अथवा गन्धसलिलावसिक्तभूमिभागेषु प्रकीर्णवकुलमल्लिकोत्पलदलेषु मारुतग्राहिषु गृहमध्येषु यो निरुध्यते प्रियया तेनातिपाति यौवनमनुभूतं भवति । अपि च,—

आदष्टस्फुरिताधरे भवति यो वक्त्रारविन्दे रसः
प्रीतिर्या च हृतांशुके च जघने काञ्चीप्रभोद्योतिते ।
लक्ष्मीर्या च नखक्षताङ्कुरधरे पीने कपोले स्त्रियो
रक्तं तेन विरज्यते न हृदयं जात्यन्तरेऽपि ध्रुवम् ॥

अयन्तु तपस्वी लोकः पिपीलिकाधर्मोऽन्योन्यानुचरितानुगामी प्राणापायहेतुभिः स्वयमपरीक्ष्य स्वर्गः स्वर्ग इति मृगतृष्णिकासदृशेन केनाप्यसद्वादेन विकृष्यमाणहृदयो मरुत्प्रपाताग्निप्रवेशनादिभिरन्यैश्च घोरैर्जपहोमव्रतानियमवेषैः स्वर्गमभिकाङ्क्षते । परीक्षितुं नेच्छति परमार्थम् । स्वर्गे सन्निहिताः प्रमादाः श्रूयन्ते । तस्य तस्यां मनुष्यत्वाच्च परस्परविरोधित्वाच्च सुखोत्पत्तिर्न विद्यते । नित्यसन्निहितत्वाच्चाविरहिताः कां प्रीतिं करिष्यन्ति । अन्योऽन्यानभिज्ञत्वाच्च(ञा) व्यक्तगुणोपभोगेऽप्यसमर्थाश्च भवन्ति । यदपि चात्र सौवर्णानि गृहाणि सौवर्णास्तरवः श्रूयन्ते तद्विबुधानामदाक्षिण्यसर्वस्वम् । यदि तावत्सौवर्णानि गृहाणि सौवर्णास्तरवः केनालङ्क्रियन्ते स्त्रियः । कोऽत्र विशेषः । कथं भवनविनियोगादुपनीतं कुहकं स्त्रीणां शोभामुत्पादयति । यश्च कामिनीभिः स्वयमेव पुत्रवत्संवर्धितसंमानितानां युवतिकेशहस्तसंक्रान्तकुसुमसमुदायानां गृहोपवनबालवृक्षाणामुपभोगो रम्यो भविष्यति कुतः स जातिकठिनानां कनकतरूणाम्? तारुण्यबद्धकामतन्त्रस्य परस्परदर्शनोत्सुकस्य मदनदूतीवचनाभितृषितस्यान्योऽन्यमुपालभ्यमानस्य प्रीतिफलेप्सोः कामिजनस्य या प्रीतिरुत्पद्यते कुतः सा शापभयोद्विग्नस्त्रीजने स्वर्गे ? ये च प्रणयकुपितासु कामिनीषु तत्कालोत्कण्ठानुरूपान् रम्यान् प्रसादनोपायान् मित्रैः सह चिन्तयतः सायामा इव दिवसा व्रजन्ति कुतस्त ईर्ष्याविरहिते स्वर्गे? यस्य (च) भावविनिविष्टाङ्ग्यो वक्षःस्थलशायिन्यो वकुलकुसुमनिश्वाससमाकर्तैर्घ्राणमाघ्राययन्त्यः स्त्रियो निद्रासुखमुत्पादयन्ति कुत-

सन्निद्राविरहिते स्वर्गे ? यानि वारुणीमदविलुलिताक्षराणि किमपि किमपि लज्जावन्ति प्रियाणि प्रियार्थानि वचांसि स्त्रीणां कुतस्तानि पानविरहिते स्वर्गे ? सुकृतसीत्काराणि श्वसितबहुलान्युपगूहनदूतानि नववधूरतानि कुत एव स्वर्गे ? भोः मां प्रति वरं श्रोत्रियैर्वृद्धैः सहासितुं नाप्सरोभिः । तास्तु दीर्घायुष्मत्यः संस्कृतभाषिण्यो महाप्रभावाश्च श्रूयन्ते । यासु वसिष्ठागस्त्यप्रभृतयो महर्षयः समुत्पन्नास्तासु को विस्रम्भः । पश्यतु भवान्—

शाठ्यमनृतं मदो मात्सर्यमवमतं तथा प्रणयकोपः ।
मदनस्ययोनयः किल विद्यन्ते नैव ताः स्वर्गे ॥

तस्माद्यद्यस्तिकाममव्याहतमनुभवितुं स्पृहा भोस्तेनेहैवरन्तव्यम् । विशेषेण वेशवधूभिः सह । इह हि —

आद्वारादनुगम्य साश्रुवदनं यं प्रेक्षते शंभली
वस्त्रान्ते परिलम्बते यमनृतक्रोधप्रयातं प्रियम् ।
क्रुद्धश्चाप्यनुनीयमानकठिनो यः क्रुध्यते कान्तया
कामस्तेन समुद्धतध्वजरथः सञ्चूर्ण्य संमर्दितः ॥

अये सुनन्दा । किं ब्रवीषि —"सर्वं मयाश्रुतं" इति । हन्त ! विक्रीतपण्याः स्मः । वासु न खलु विप्रलम्भितम् । किं ब्रवीषि— "न खलु चन्द्रादन्धकारो निष्पतति" इति । सुनन्दे तवैव सदृशमेतद्वाक्यम् । अत एव त्वयैतदुच्यते । एवमभ्यन्तरं प्रविशाव(मः) । (प्रविश्य) भवति विसर्जयितुमिच्छामि । संप्रति हि—

बध्वा मानिनि मेखलां प्रशिथिलां पीत्वा सकृद्वारुणीं
कृत्वा कान्तकरग्रहप्रणयिनः पुष्पोत्कटान् मूर्धजान् ।
हस्तालम्बितमेखलाभिरसकृत्स्त्रीभिः कटाक्षाहतो
हैमः कूर्म इवावसीदति शनैः संक्षिप्तपादो रविः ॥

किं ब्रवीषि—"न शक्यमद्य त्वयार्धपादमपीतो गन्तुं" इति । भोः गन्तव्यमेव । मे भार्याकळेबरमन्यथा प्रहास्यति । किमाह भवती—"अहन्तामनुनेष्यामि" इति । राजवद्गुह्यादप्रतिगृहीतानुनय इव दुर्जनो न शक्योऽनुनेतुम् (?) इदं गम्यते । कथं पादयोर्लग्ना सह विश्वलकेन । हन्त! पङ्गूकृताः स्मः । सुनन्दे ।

नत्वाहमतिवर्तिष्ये वेलामिव महोदधिः ।
इमामपि महीं पातु राजा सागरमेखलाम् ॥

(निष्क्रान्तो विटः)

इति श्री ईश्वरदत्तस्य कृतिः धूर्तविटसंवादो नाम

भाणः समाप्तः ।

श्रीरस्तु ।

वररुचिकृता ।

उभयाभिसारिका ।

---:०:---

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू—

कोऽसि त्वं मे कावाहं ते विसृज शठ मम निवसनं मुखं किमपेक्षसे
न व्यग्राहं जाने ही ही तव सुभग दशनवसनं प्रियादशनाङ्कितम् ।
या ते रुष्टा सा ते नाहं व्रज चपल हृदयनिलयां प्रसादय कामिनी
मित्येवं वः कन्दर्पार्ताः प्रणयकृतकलहकुपिता वदन्तु वरस्त्रियः ॥

एवमार्यमिश्रान् विज्ञापयामि । अये ! किं नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग पश्यामि (नेपथ्ये)—

वसन्तप्रमुखे काले लोध्रवृक्षो गतप्रभः ।
मित्रकार्येण संभ्रान्तो दीनो विट इव स्थितः ॥

(निष्क्रान्तः)

स्थापना ।

(ततः प्रविशति विटः)

विटः—अहो ! वसन्तसमृद्धिः कुतः !

परभृतचूताशोका डोला परवारुणी शशाङ्कश्च ।
मधुगुणविगुणितशोभा मदनमपि सविभ्रमं कुर्युः ॥

अहो ! परस्परव्यळीकं सहते कामिजनः । अहो ! अप्रतिहत-शासनो भ्रमति दूतीजनः । अहो ! ऋतुकालप्राधान्यम् । प्रवाळमुक्तामणिरशनादुकूलपेलवांशुकहारहरिचन्दनादीनां वर्धते सौभाग्यम् । सर्वजनमदनजनने लोककान्ते वसन्त एवं विजृम्भमाणे सागरदत्तश्रेष्ठिपुत्रस्य कुबेरदत्तस्य नारायणदत्तायाश्च कश्चित्कलहाभिनिवेशः संवृत्तः । एतत्कारणात्कुबेरदत्तेनात्मनः परिचारकः सहकारको नाम मां प्रति प्रेषितः "भगवतो नारायणस्य भवने मदनसेनया मदनाराधने संगीतके यथारसमभिनीयमाने ततो मामतीत्य सा त्वया प्रशस्तेति तत्संक्रान्तमदनानुरागशङ्कया परिकुपिता नारायणदत्ता चरणपतनमप्यनवेक्ष्य स्वभवनमेव गता । तद्गतमदनानुरागतप्तहृदयस्य यथा ममेयं रजनी रजनीसहस्रवन्न व्यतिगच्छेत् तथा चास्य नगरस्य सर्वकालवसन्तभूतेन भाववैशिकाचलेन कृतां सन्धिमिच्छामि" इति । श्रुत्वैव तद्वचनमभिज्ञातया मदनदुःखस्याप्यसह्यत्वात्प्रदोष एवाभिप्रस्थितः सन्नस्मद्वयःप्रमाणमगणयन्त्याऽऽत्मयौवनावस्थामेव चिन्तयन्त्यास्मद्द्रोहिन्याऽन्यथाशङ्कमानया निवारितोऽस्मि । तदेष इदानीं तस्याः कोपविनाशने कृतप्रतिज्ञो गमिष्यामि । अथवा किमत्र मया प्रतिज्ञातव्यम् । कुतः—

मधुरैः कोकिलालापैश्चूताङ्कुरनिबोधितैः ।
वसन्तः कलहावस्थां कामिनीमनुनेष्यति ॥

अपि च—

कान्तं रूपं यौवनं चारुशीलं
दानं दाक्षिण्यं वाक् च सामोपपन्ना ।
यं प्राप्यैते सद्गुणा भान्ति सर्वे
लोके कामिन्यः केन तस्य प्रसाद्याः ॥

(परिक्रम्य) अहो ! कुसुमपुरराजमार्गस्य परा श्रीः । इह

हि— सुसिक्तसंमृष्टोञ्चावचकुसुमोपहारा अन्यगृहाणां वासगृहाय न्ते रथ्याः । नानाविधानां पण्यसमुदायानां क्रयविक्रयव्यापृतजनेन शोभन्तेऽन्तरापणमुखानि । ब्रह्मोदाहरणसंगीतधनुर्ज्याघोषैरन्योऽन्य मभिव्याहरन्तीव प्रासादपङ्क्तयः । क्वचिदुद्घाटितगवाक्षेषु प्रासादमेघेषु रथ्यावलोकनकुतूहला: शोभन्ते प्रमदाविद्युत: कैलासपर्वतान्तर्गता इवाप्सरसः। अपि च, प्रवरहयगजरथगता इतस्ततः परिचलन्तः शोभन्ते महामात्रमुख्याः। तरुणजननयनमनोहरणसमर्था श्चारुलीलाः स्थानविन्यस्तभूषणाः सुरनगरवरयुवतिश्रिय मपहसन्त्यः परिचरन्ति प्रेष्ययुवतयः। सर्वजननयनभ्रमरै रापीयमानमुखकमलशोभा रथ्यानुग्रहार्थमिव पादप्रचारलीलामनुभवन्ति गणिकादारिकाः । किं बहुना—

सर्वै र्वीतभयैः प्रहृष्टवदनै र्नित्योत्सवव्यापृतैः
श्रीमद्रत्नविभूषणाङ्गरचनैः स्रग्गन्धवस्त्रोज्वलैः ।
क्रीडासौख्यपरायणैर्विरचितप्रख्यातनानागुणै-
र्भूमिः पाटलिपुत्रचारुतिलका स्वर्गायते साम्प्रतम् ॥

(परिक्रम्य) अये ! इयं खलु चारणदास्या दुहिता अनङ्गदत्ता नाम सुरतपरिश्रमखेदालसा चतुरपदविन्यासा सर्वजननयनामृतायमानरूपा इत एवाभिवर्तते । अवश्यमनया प्रियजननिर्दयोपभुक्तया भवितव्यम् । कुतः—

दशनपदचित्रितोष्ठं निद्रालसलोललोचनं वदनम् ॥
जघनञ्च सुरतविभ्रमविलुलितरशनागुणपरीतम् ॥

भो अस्या दर्शनमेव च नः कार्यसिद्धिनिमित्तम् । अये मामनवेक्ष्यैव गता । अभिभाषिष्ये तावदेनाम् । हन्त ! स्वयमेव प्रतिनिवृत्ता । (उपगम्य) वासु ! किं नाभिवादयसि । किं ब्रवीषि "चिरेण विज्ञातास्मि भवन्त मभिवादयामि" इति । श्रूयतामियमाशीः—

प्रथमवयसं स्वतन्त्रं दातारं चारुरूपमर्थाढ्यम् ।
भद्रे लभस्व भद्रं कुशलं कान्तं रतिपरं च ॥

वास्तु सर्वं तावत् तिष्ठतु ।

विधेयो मन्मथस्तस्य सफलं तस्य जीवितम् ।
वेशलक्ष्म्या त्वया सार्धं यस्येयं रजनी गता ॥

किं ब्रवीषि, "महामात्रपुत्रस्य नागदत्तस्योदवसितादागच्छामि" इति । भद्रे भूतपूर्वविभवः खल्वेषः । व्यक्तं मातु रप्रिय मुपपादितम् । कथं व्रीळावनतवदनयाऽनया हसितम् । हन्त ! सफलो नः प्रतर्कः । मामैवम् । कुतः—

मातुर्लोभ मपास्य यद्रतिसुखेष्वासक्तचित्ता सती
त्यक्त्वा वैशिकशासनं बहुफलं वेश्याङ्गनादुस्त्यजम् ।
गत्वा कान्तनिवेशनं बहुरसं प्राप्तासि कामोत्सवं
तेनायं गणिकाजन स्तव गुणैर्निक्षिप्तपादः कृतः ॥

अहो स्थाने खलु ते व्रीळा । किं शपथेन । स्वगृह मागत्यानुनेष्यामि ते मातरम् । त्वया तु वेश्योपचारविरुद्धं कृतम् । गच्छतु भवती । किं ब्रवीषि — "अभिवादयामि" इति । सुभगे श्रूयतामियमाशीः—

स्वगुणाः सद्गुणाः सर्वे न स्तोतव्याः स्थिता स्त्वयि ।
लोकलोचनकान्तं ते स्थिरीभवतु यौवनम् ॥

गतैषा । वयमपि गच्छामः । (परिक्रम्य)

अये एषा खलु विष्णुदत्ताया दुहिता माधवसेना नाम अनपेक्षितपरिजनानुसरणा व्याघ्रानुसारवित्रस्तमृगपोतिकेव त्वरिततरपदविन्यासा इत एवाभिवर्तते । व्यक्तमिदानीं जननीलोभदोषादनिष्टजनसंभोगपरिक्लिष्टयानया भवितव्यम् । तथा हि—

नैं ग्लानं वदनं न केशरचना प्रभ्रष्टपुष्पद्युतिः ।
दन्ताक्रान्तनिपीतकोमलरुचिर्नैवाधरोष्ठः कृतः ।
गाढालिङ्गनवर्जितौ स्तनतटावक्लिष्टपूर्णश्रियौ
श्रोण्यां रागरतिप्रबन्धशिथिला न व्याकुला मेखला ॥

अये अनिर्धनजनसंभोगजनितसन्त्रासा मामनवेक्ष्यैवातिक्रान्ता । भवतु । एनामनुसृत्य निर्वेदकारणं ज्ञास्यामहे । हन्त ! स्वयमेव प्रतिनिवृत्ता । किं ब्रवीषि— "न मया भावोऽलक्ष्यत" इति । वासु नास्ति दोषः । परिक्लिष्टतया व्याकुलितचित्तानां बुद्धयो हि ससंभ्रमा भवन्ति । किं ब्रवीषि— "अभिवादयामि" इति । प्रतिगृह्यतामय माशीर्वादः—

आढ्यास्ते दयितास्सन्तु विप्रियास्सन्तु निर्धनाः ।
मातुर्लोभात्कदाचित्स्यान्नाप्रियैरपि सङ्गमः ॥

वासु कुत आगम्यते ?

किं ब्रवीषि— "धनदत्तसार्थवाहपुत्रस्य समुद्रदत्तस्योदवसितादागच्छामि" इति । अहो ! प्राप्तं कृतम् । अद्यतनकालवैश्रवणः खल्वेषः । किं दीर्घोष्णश्वसितविकम्पिताधरकिसलयं भ्रुकुटीविजिह्मितनयनं व्यावर्तितमेवानया वदनकमलम् । हन्त ! अयावितथप्रतर्कः स्मः । कुतः—

कृच्छ्राद्दत्तोष्ठबिंबं विरलमृदुकथं हासलीलावियुक्तं
जृंभोष्णश्वासमिश्रं परिशिथिलभुजालिङ्गनं वीतरागम् ।
दुःखादाश्रित्यशय्यां कृतकरतिविधौ चेष्टितं भावहीनं
व्यक्तं बालेऽकृथास्त्वं निशि दिवसकस्योदयं चिन्तयन्ती ॥

वासु अलमलं विषादेन । रूपावरोऽपि धनवान् गम्येष्वभिहित एव । श्रूयताम्—

सर्वथा रागमुत्पाद्य विप्रियस्य प्रियस्य वा ।
अर्थस्यैवार्जनं कार्यमिति शास्त्रविनिश्चयः ॥

किं ब्रवीषि—"भावस्यापि खलु मे जनन्याः समोनिश्चयः" इति । भवति मामैवम् । अस्त्येतत्कारणम् । गच्छतु भवती । त्वद्गृहमेवागत्य शास्त्रं तत्वतस्त्वा ग्राहयिष्यामि । अहो ! उपदेशदोषादनभिवादैवगता । अहो ! तपस्विन्या उद्वेगः । वयमपि साधयामस्तावत् । (परिक्रम्य)

अये एषा खलु विलासकौण्डिनी नाम परिव्राजिका सललितमृदुपदविन्यासा नयनामृतायमानरूपा इत एवाभिवर्तते । अस्याः पटवासगन्धोन्मत्ता भ्रमन्तो मधुकरगणाश्चूतशिखराण्यपि त्यक्त्वा परिव्रजन्ति खल्वेनाम् । अभिभाषिष्ये तावदेनाम् । यतो नयनश्रवणकुतूहलमपनेष्यामि । भगवति वैशिकाचलोऽहमभिवादये । किं ब्रवीषि—"न वैशिकाचलेन प्रयोजनं, भवेद्वैशेषिकाचलेन" इति । अस्त्येतत्कारणम् । कुतः—

दृष्टिस्तेऽतिविशालचारुरुचिरा नैकत्र सन्तिष्ठते ।
ग्लान्या कान्ततरं रतिश्रमयुतं शूनाधरोष्ठं मुखम् ॥
आचष्टे सुरतोत्सवप्रकरणं खेदालसा ते गतिः
व्यक्तं ते कथितं प्रियेण सुभगे रत्यर्थवैशेषिकम् ॥

किं ब्रवीषि—"अहो दासेनात्मसदृशमभिहितम्" इति ।

धन्या भवन्ति सुभगे दासास्ते चरणकमलयुगलस्य ।
अस्मद्विधस्य वरतनु कुतोऽस्ति तत्क्षीणपुण्यस्य ॥

किं ब्रवीषि—"षट्पदार्थबहिष्कृतैः सह सम्भाषणमस्माकं गुरुभिः प्रतिषिद्धम्" इति । भगवति युक्तमेवैतत् । कुतः—

द्रव्यं ते तनु रायताक्षि दयिता रूपादयस्ते गुणा
सामान्यं तव यौवनं युवजनः संस्तौति कर्माणि ते ।
त्वय्यार्ये समवायमिच्छति जनो यस्माद्विशेषोऽस्ति ते
योगस्ते तरुणैर्मनोभिलषितैर्मोक्षोऽप्यनिष्टाज्जनात् ॥

अये प्रहास एव नः प्रतिवचनम् । हन्त ! सफलो नः प्रतर्कः । किं ब्रवीषि—"सांख्यमस्माभिर्ज्ञायते- अलेपको निर्गुणः क्षेत्रज्ञः पुरुषः" इति । हन्त ! निरुत्तराः स्मः । अस्मत्कथाप्रसङ्गेन सोत्कण्ठेव भवती दृश्यते । तरुणजनसुरतविघ्नोऽप्यस्माभिः परिहर्तव्यः । साधयतु भवती । गतैषा । गच्छामस्तावत् । (परिक्रम्य)

अये किं नु खल्वेषा चारणदास्या माता रामसेना नाम वयःप्रकर्षेऽपि वर्तमाना विलासविप्रेक्षितगतिहसितैर्युवतिजनलीलां विडम्बयन्ती इतएवाभिवर्तते । अहो ! विस्मयनीया खल्वेषा—

भुक्त्वा भोगानीप्सितान् कामिदत्तान्
कृत्वा सक्तान् स्वैर्गुणैः पीतसारान्
भूत्वा यूनां वैरसंघर्षयोनि-
र्नूनं दीर्घं याति कान्तं सुतायाः ॥

हन्त ! कामिजनमृत्युभूताया अस्या आदेहपातलीलामनुभवामस्तावत् । नमोऽस्त्वस्यै कामुकजनमहाशनये । बाले रामसेने दुहितृसङ्क्रान्तयौवनसौभाग्ये कतरस्य कामिनः कुलोत्सादनार्थमभिप्रस्थिता भवती । भोः तद्दर्शने शपथ एव नः प्रतिवचनम् । किं ब्रवीषि—"त्वच्छीलमेव त्वामाक्रोशयति" इति । अलमत्र बहुभाषित्वेन । त्वद्गमनमेव तावदुच्यताम् । किं ब्रवीषि—"दुहिता मे चारणदासी ह्यस्तनेऽहनि गता धनिकोद्वसितम् । एनां सङ्गीतकव्यपदेशेनाकर्षितुमभिप्रस्थितास्मि" इति । अहो नु खलु चारणदास्याः प्रमादः । कुतः— कामुकजनसर्वस्वहरणकुशलाया निष्पीतसा

रपरित्यागसामर्थ्ययुक्तायास्तथापि नाम दुहिता भूत्वा शास्त्रोपदेशग्रहणेन शोच्या खलु सा तपस्विनी । कुतः—

लब्ध्वा गम्यं प्राप्यचार्थं यथावत्
ज्ञात्वा सम्यङ् निर्धनत्वं च तस्य ।
रागात्सक्तं विप्रमोक्तुं न वेत्ति
मिथ्या तस्याः शास्त्रतत्त्वोपदेशः ॥

किं ब्रवीषि— "सङ्गीतकव्यपदेशेन तां गृहमानयिष्यामि, त्वयापि प्रत्यागतेन तत्रागम्य शास्त्रतत्त्वश्रुतिं ग्राहयितव्या" इति । एवमस्तु । किन्तु त्वरानुष्ठेयं मित्रकार्यमस्ति । तत्समानीय भवत्याः कार्यमपि साधयिष्यामि । गच्छतु भवती । साधयामस्तावत् ।

अहो ! अविश्वसनीयानि खलु गणिकाजनस्य हृदयानि । कुतः—

स्निग्धैः प्रश्लिष्टैः क्रीडनैर्लालयित्वा
हृत्वा सर्वस्वं निर्घृणाः कामुकानाम् ।
लुब्धा वेश्या स्तानन्यसंरञ्जनार्थं
देहान् वैराग्याद्देहिवत्सन्त्यजन्ति ॥

अहो ! गणिकामातरो नाम कामुकजनस्य निष्प्रतीकारा ईतयः । सर्वथा स्वस्त्यस्तु कामुकेभ्यः । विनाशोऽस्तु कामुकजनसर्वस्वहरणकुशलाभ्यो गणिकाजनमातृभ्यो गणिकामोधास्त्रसर्गनिपुणाभ्यः । (परिक्रम्य)

अहो ! राजमार्गस्य कलिः सुकुमारिका नाम तृतीया प्रकृतिरित एवाभिवर्तते । अहो अमङ्गलदर्शनैषा , भवतु । अनभिभाष्यैनां वस्त्रमन्तरीकृत्यातिक्रमिष्यमस्तावत् । (तथा कुर्वन्) अये अनुधावत्येव माम् । केदानीं मे गतिः । अहो बलवान् कृतान्तः— यस्मात्प्रियमाभिभाष्यैनां व्याघ्रमुखादिवात्मानं मोचयिष्यामि । किं

ब्रवीषि— "अभिवादयामि" इति । वासु अविधवा बहुपुत्रा भव अथ च—

भ्रूक्षेपाक्षिविचारणोष्ठचलनैर्बाह्वोश्च विक्षेपणै
र्गत्या चारुकया विलासहसितैः स्त्रीविभ्रमा निर्जिताः ।
विस्पष्टाकुललोललम्बिरशना श्रोणी विशालायता
कस्यायासि रतैरतृप्तहृदया गेहाद्विशालेक्षणे ॥

किं ब्रवीषि— "राजस्यालस्य रामसेनस्य गृहादागच्छामि" इति । अहो ! सफलं जीवितं तस्य । सुभगे किमिदानीं चक्रवाकमिथुनस्येव वियोगः संवृत्तः । किं ब्रवीषि— "राजावस्थानं गच्छन्त्या गणिकापरिचारिकया रतिलतिकया चतुरमधुरहसितरातिचेष्टया सस्नेहललितकटाक्षविक्षेपाम्बुभिराभिषिच्यमानहृदयः समुद्गतरोमाञ्चानिवेद्यमानमदनानुरागः स तस्यास्तं मदनानुरागं शिरःप्रणामेन प्रतिगृहीतवान् । ततस्तत्प्रत्यक्षव्यलीकमसहमानया मया प्रत्यादिष्टस्सन् पादयोर्मे पतितः । तथापि च मया इर्ष्याभिभूतहृदयया नैवास्य प्रसादः कृतः । ततो मामसौ बलात्कारेण गृहमानीय पर्यङ्कतलमारोप्य मया सहासितः । स पुनर्मां मदनाक्रान्तो रजन्यां मदनवेगखेदसुप्तां परित्यज्य तस्या एव गृहं गत्वाद्य कतिपयान्यहानि नैव गृहमागच्छतीति पुनरस्याहमनुनयमगृहीत्वा पश्चात्तापेन दह्यमाना भावसमीपमुपागता यदृच्छया भावं समासादितास्मि । तद्भावः प्राणसमेन मे सन्धानं कर्तुमर्हति" इति । वासु अहो रामसेनस्य प्रमादः । कुतः—

व्याक्षेपं कुरुतस्तनौ न सुरते गाढोपगूढस्य ते
रागघ्नस्तव मासि मासि सुभगे नैवार्तवस्यागमः
रूपश्रीनवयौवनोदयरिपुर्गर्भोऽपि नैवास्ति ते
त्वमेवं सगुणां विहास्यति सचेद्रत्युत्सवं त्यक्ष्यति ॥

भवत्विदानीम् । मानिनि तस्यैव स्वोद्वासिते मां प्रतिपालय । अस्ति तावन्मम मित्रकार्यं किञ्चित्त्वरानुष्ठेयम् । तत्समानीय तं भगिनीसौभाग्यगर्वितं सुकुमारहृदयानां त्वद्विधानां युवतीनां भावबहिष्कृतं गृहमागत्य चरणयोस्ते पातयिष्यामि । गच्छतु भवती । गतैषा । गच्छाम्यहम् । अहो ! कृच्छ्रेण खल्वस्माभिः प्रकृतिजनादात्मा मोचितः । (परिक्रम्य)

अये को नु खल्वयमागम्य मामभिवादयति । स्वस्ति भवते । चिरेणेदानीं मया संलक्षितोऽसि । पार्थकसार्थवाहपुत्रो धनमित्रो ननु भवान् । अथ भृत्यार्थिसंबन्धिसुहृज्जनदारिद्र्यतमोपहस्य युवतिजनहृदयकुमुदविबोधनकरस्य कुसुमपुरगगनपूर्णचन्द्रस्य कथमयं ते व्यसनोपरागः संवृत्तः ? किमतिलाभकांक्षया कुटुम्बसर्वस्वेन संगृहीतभाण्डो दशान्तरमभिगच्छन्नन्तरा चोरैरभ्यासादितो भवान् ? आहोस्वित् राज्ञोऽपथ्यमाचरत स्ते राज्ञापहृतं सर्वस्वम् ? अथवा एकाक्षपातमात्रेण धनदस्यापि विभवहरणसमर्थेन द्यूतेन क्षपितो भवान् ? किं बहुना— —

संरूढदीर्घनखलोममलाचिताङ्गो
ध्यानाभिभूतपरिपाण्डुरशुष्कवक्त्रः ।
अश्लक्ष्णजीर्णमलकीर्णविशीर्णवस्त्रो
नाभासि दिव्यमुनिशापहतो यथैव ॥

किं ब्रवीषि— "यथा रामसेनाया दुहितरि रतिसेनायां परमो मम मदनानुराग संवृत्तः । तस्याश्च मयि तथा । सर्वमेतद्विदितं भावस्य । अतो मातुर्लोभविकारं ज्ञात्वापि सा मां न त्यक्ष्यतीति सुहृज्जनेन निवार्यमाणेनापि मया कुटुम्बसर्वस्वं तस्यै युगपदेवोपनीतम् । ततस्तद्गृहीत्वा कतिपयेष्वेवाहस्सु गतेषु स्नानव्यपदेशेन स्ना-

नीयशाटिकां परिधाप्य मा मशोकवनिकादीर्घिकां प्रवेश्य द्वारे चापिहिते अशोकवनिकारक्षिभिः विदितपरमार्थैः पुरुषैश्छिद्रद्वारेण निष्क्रामितोऽहम् । ततोस्मिन्नेव नगरे ऊर्जितमुषित्वा कथमिदानीं बहून्यहानि हीनवासं पश्यामीति अरण्यमभिप्रस्थितेन मया यदृच्छया भाव एवासादितः । सुगुह्यमप्येतद्भावस्य निवेदितम् । तदिदानीं भावेनानुज्ञातःस्वात्मनिःश्रेयसं चिन्तयिष्यामि" इति । अहो ! लोभाभिनिवेशो वेशस्य । अहो ! कुटिलस्वभावता च । एहि परिष्वजामहे तावद् भवन्तम् । दिष्ट्या जीवन्तं त्वां पश्यामि । कुतः—

शान्तिं याति शनैर्महौषधिबलादाशीविषाणां विषं
शक्यो मोचयितुं मदोत्कटकटादात्मागजेन्द्राद्वने ।
ग्राहस्यापि मुखान्महार्णवजले मोक्षः कदाचिद्भवेत्
वेशस्त्रीबडबामुखानलगतो नैवोत्थितो दृश्यते ॥

अथ भद्रमुख भवतो निर्वेदस्य कारणं रतिसेना, आहोस्विदस्या जननी ? किं ब्रवीषि—"किमित्यनृतमभिधास्यामि । रतिसेना मां प्रति सस्नेहैव । मातृदोषेणैवेदं संवृत्तम् । यदि तावद्भावः स्वल्पमपि तस्या मातुरविदितमेव मे समागमं प्रति यत्नं कुर्यात ततो मे प्राणाः प्रत्यानीता भवेयुः" इति । जाने तस्यास्त्वय्यनुरागमन्यस्मादपि जनान्मया नाम श्रुतम् । हा रोदित्ययम् । अलमलं विषादेन । ममेदानीं किञ्चित्त्वरानुष्ठेयं मित्रकार्यं मस्ति । तत्संपाद्य पुनरागम्य तवापि कार्यं साधयामि । गच्छतु भवान् । अहो ! निपुणता वेश्याङ्गनानाम । कुतः ।

यथा नरेन्द्राः कुटिलस्वभावाः स्वं दुष्कृतं मन्त्रिषु पातयन्ति ।
तथैव वेश्याः शठधूर्तभावाः स्वं दुष्कृतं मातृषु पातयन्ति ॥

अहो गत एव तपस्वी खलजनोपाध्यायः । वयमपि साधयामस्तावत् । (परिक्रम्य)

अये वसन्तवनकोकिलानुसारिणा स्निग्धमधुरेण स्वरेण कया-नु खल्वस्मन्नामधेयाभिव्यक्तिः क्रियते । (विलोक्य)

अये प्रियङ्गुसेना ! अयि प्रियङ्गुसेने अयमहमागच्छामि । किं ब्रवीषि—"अभिवादयामि" इति । वासु प्रतिगृह्यतां प्रियमाशीः—

रमणं निवारयन्ती कोमलकरचरणताडनैः शयने ।
........सविमृदित सुविपुलजघना सुखमुपेहि ॥

वासु अतिपरिश्रान्तजघनाप्यायनकरस्य नानागन्धाधिवासितस्य सुरभिगन्धिनो गन्धतैलस्यात्माङ्गस्पर्शप्रदानेन किमनुग्रहः क्रियते ? भद्रमुखि अवतारितघण्टाग्रैवेयककक्षाया राजोपवाह्यकरेणोरिवावमुक्तालङ्कारायाः निर्व्याजमनोहररूपायाश्चारुशोभं ते वपुर्यो न पश्यति स खलु वञ्चितः स्यात् । कुतः—

मुक्तालङ्कारशोभां नखरपदचितां गन्धतैलाङ्गरागा-
मीषत्ताम्रान्तनेत्रां प्रहसितवदनां यौवनौष्ण्यस्तनाढ्याम् ।
सुश्लक्ष्णार्द्रोरुवस्त्रां व्यपगतरशनां व्यायतश्रोणिबिंबां
दृष्ट्वा त्वां चारुरूपां प्रविचलितधृतिर्मन्मथोऽप्यातुरः स्यात् ॥

किं ब्रवीषि—"प्रियवचनं भाव ?" इति ।

भोः किमयं सेवावादः । अलं व्रीलामुत्पाद्य । आह्वानप्रयोजनं तावदुच्यताम् । किं ब्रवीषि— "श्रूयताम्" इति । वासु अवहितोऽस्मि । किं ब्रवीषि— "भगवतोऽप्रतिहतशासनस्य कुसुमपुरपुरन्दरस्य भवने पुरन्दरविजयं नाम सङ्गीतकं यथारसाभिनयमभिनेतव्यमिति देवदत्तया सह मे पणितः संवृत्तः । अत्र ममाभ्युदयस्य भावः कारणम्" इति । मामैवम् । सकलशशाङ्कविमलाय रजन्यां नास्ति दीपप्रयोजनम् । अपि च बलवतो नास्ति सहाय-

सम्पत्प्रयोजनम् । भवत्येवात्र कारणम् । अस्मिन्नेवार्थे त्वदर्पितमदनानुरागहृदयेन रामसेनेनाभ्यर्थितोऽस्मि । कथं सभ्रूविलासविक्षेपमीषत्कुञ्चितनयनकपोलनिवेश्यमानान्तर्गतप्रहर्षं प्रचलिताधरकिसलयं मुखकमलं परिवर्त्य परिजनमवलोकयन्त्यानया हसितं हन्त प्राप्तं सेवाफलं रामसेनेन । अहो देवदत्ताया अकुशलता । या त्वया सह संघर्षं कुरुते । यस्यास्तावत्प्रथमं रूपश्रीनवयौवनद्युतिकान्त्यादीनां गुणानां सम्पत्, चतुर्विधाभिनयसिद्धिः, द्वात्रिंशद्विधो हस्तप्रचारः, अष्टादशविधं निरीक्षणं, षट् स्थानानि, गति द्वयं (त्रयं), अष्टौ रसाः, त्रयो गीतवादित्रादिलया इत्येवमादीनि नृत्तांगानि त्वदाश्रयेणालंकृतानि । अथवा अनेनापि वेषेण देवासुरमहर्षिमनोनयनहरणसमर्थानामप्सरोगणानामपि लंघनसमर्थेति त्वां पश्यामि । अपि च—

प्रतिनर्तयसे नित्यं जननयनमनांसि चेष्टितैर्ललितैः ।
किं नर्तनेन सुभगे पर्याप्ता चारुलीलैव ॥

अये व्रीडिता । हन्त अनेनैव व्रीडालङ्कारेण विसर्जिताः स्मः । गच्छामस्तावत् । (परिक्रम्य)

अये किन्नु खल्वेषा नारायणदत्तायाश्चेटिका कनकलता नाम चूर्णामोदितकर्कशस्तनयुगळं विविधकुसुमालंकृतकेशहस्ता किमपि खलु प्रहृष्टवदना मदविलासस्खलितपदविन्यासा इत एवाभिवर्तते । अभिभाषिष्ये तावदेनाम् । कथमन्तिकमुपेत्य मामभिवादयति । वासु किं ब्रवीषि? "अभिवादयामि" इति । वासु प्रियस्य दयिता भव । भवति चरणकमलविन्यासेन किमयं मार्गानुग्रहः क्रियते । किं ब्रवीषि? "प्रियवादी खलु भावः" इति । भद्रे नैष संस्तवः । किं ब्रवीषि? "अनुगृहीतास्मि" इति । सर्वं तावत्तिष्ठतु । किमिदानीं चक्रवाकमिथुनस्येव वियोगस्संवृत्तः । किं ब्रवीषि? "इर्ष्याभिभूतहृदयायां परित्यक्तस्नानशयनभोजनालङ्कारायामशोकवनिकायामशोकवा-

लवृक्षसंश्रिते शिलातल उपविष्टायामीषत्पर्याप्त चन्द्रमण्डलदर्शनेनानिभृतमधुकररवेण वसन्तकुसुमगन्धामोदकर्कशेन दक्षिणपवनेन च परिवर्धितसन्तापायां सखीजनमधुरवचनैराश्वास्यमानायामस्मदज्जुकायामशोकवनिकाभ्याशे कोऽपि खलु पुरुषस्संदिष्ट इव मदनेनाव्यक्तकाकलीं रचनामूर्छनां वीणां कृत्वा इमे वक्त्रापरवक्त्रे गायन्नतिक्रान्तः ।

निष्फलं यौवनं तस्य रूपश्च विभवश्च यः ।
यो जनः प्रियसंसक्तो न क्रीडति वसन्तके ॥

अपि च—

शशिनमभिसमीक्ष्य निर्मलं
परभृतरम्यरवं निशम्य वा ।
अनुनयति न यः प्रियं जनं
विफलतरं भुवि तस्य जीवितम् ॥ इति ।

ततस्तेन गीतकेन शिथिलीकृतमानपरिग्रहास्मदज्जुका आयुष्मदागमनमप्यप्रतिपालयन्ती मामेवाहूय पादचारेणैवास्मद्भर्तृदारकगृहमभिप्रस्थिता । तथैवास्मद्भर्तृदारकोऽपि वसन्ताक्रान्तशिथिलीकृत धृतिर्भूत्वा सह केनाप्यस्मदज्जुकामनुनेतुमागच्छन् वीणाचार्यस्य विश्वावसुदत्तस्योदवसितद्वार्यस्मदज्जुकां समासादितवान् । ततस्तौ किञ्चिदप्रतिपद्यमानौ दृष्ट्वा यदृच्छया निर्गतेन विश्वावसुदत्तेनात्मन उदवसितमेव प्रवेशितौ । ततः प्रभातेऽस्मदज्जुकयाहमभिहितः "भाव वैशिकाचलं गृहीत्वागच्छ" इति । तदागम्यतां" इति । अहो श्रुतिसुखं निवेदितं भवत्या । किमन्यां ते प्रीतिमुत्पादयिष्यामि । प्रतिगृह्यतामियमाशीः—

तव भवतु यौवनश्रीः प्रियस्य सततं भव प्रियतमा त्वम् ।
अनवरतमुचितमभिमतमुपभोगसुखं च ते भवतु ॥

गच्छाग्रतः (परिक्रम्य) किमाह कनकलता "एतद्गृहान् प्रविशाम"

इति । बाढं प्रविशामस्तावत् । (प्रविश्य) अलमलं संभ्रमेण । आस्तामास्तां कामियुगळं—

अत्मगुणेन वसन्तो यथाद्य युवयोः समागममकार्षीत् ।
ऋतवस्तथैव सर्वे कुर्वन्तु समागमं कलहे ॥

आत्मगुणगर्वितेन वसन्तेनाहमपि वञ्चितः । यतो युवयोः समागमबहिष्कृतः । किमिदानीमभिधास्यामि । अथवा नास्त्यत्रापराधो वसन्तस्य । कुतः—

उद्यानानि निशाश्च चन्द्रसहिता वीणाश्च रक्तस्वरा
गोष्ठी दूतिजनो विचित्रवचनो नानाविधाश्चर्तवः ।
नैतत् कामिजनस्य संगमविधौ संजायते कारणं
ह्यन्योऽन्यस्य गुणोद्भवैरकृतकै रागोच्छ्रयः कारणम् ॥

तस्मादन्यजनदुर्लभेन परस्परगुणातिशयनिचितेनात्मगुणोपनीतेन मदनतन्त्रसारेण कुसुमपुरप्रकाशेन युवयोरेव रागेण वञ्चिताः स्मः । किं ब्रूथ "आवयोरागोऽपि भावस्यैव प्रयत्नजनितम् । तेन भाव एव समागमकारणम् । कृत्स्नमिदानीं पाटलिपुत्रं यस्य वचनलीलामनुभवति स कथं कामिजनवचनविशेषैरतिशयितो भवेत्" इति । कथाप्रसंगेन सुरततृषितस्य कामियुगळस्य रतिव्याक्षेपः परिहर्तव्यः । तदनुज्ञातो गन्तुमिच्छामि ।

(भरतवाक्यम्)

व्याकोचांभोजकान्तं मदमृदुकथितं चारुविस्तीर्णशोभं
जातस्त्वं प्रीतियुक्तः प्रिययुवतिमुखं वीक्षमाणो यथाद्य ।
एवं सस्यर्धियुक्तां जलनिधिरशनां मेरुविन्ध्यस्तनाढ्यां
प्रीतिं प्राप्नोतु सर्वां क्षितिमधिकगुणां पालयन्नो नरेन्द्रः ॥

(इति निष्क्रान्तो विटः)

इति श्रीमद्वररुचिमुनिकृतिरुभयाभिसारिका नाम भाणः समाप्तः ।

श्रीः

महाकवि

श्यामिलकविरचितं

पादताडितकम्.

—:o:—

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू— देहत्यागेन शंभोर्नयनहुतवहे मानितो येन कोपः
सेन्द्रा यस्यानुशिष्टिं स्रजमिव विबुधा धारयन्त्युत्तमाङ्गैः ।
पायात्कामः स युष्मान् प्रविततवनितालोचनापाङ्गशार्ङ्गो
बाणा यस्येन्द्रियार्था मुनिजनमनसां सादका भेदकाश्च ॥

अपि च,

सभ्रूक्षेपं सहासं स्तननिहितकरामीक्षमाणेन देवीं
सन्त्रासक्षिप्तवाग्भिः सह गणपतिभिर्नन्दिना वन्दितेन ।
पायाद्वः पुष्पकेतुर्वृषपतिककुदापाश्रयन्यस्तदोष्णा
यस्य क्रुद्धेन बाह्यं करणमपहृतं शंभुना न प्रभावः ॥ २ ॥

एवमार्यमिश्रान् शिरसा प्रणिपत्य विज्ञापयामि । यद्वयमार्यश्यामिलकस्य कृतिं पादताडितकं नाम भाणं प्रयोक्तुं व्यवसिताः । तत्तस्य कवेर्मतिपरिश्रममवधानेनानुगृहीतुमिच्छामः । कुतः—

इदमिह पदं माभूदेवं भवत्विदमन्यथा-
कृतमिदमयं ग्रन्थेनार्थो महानुपपादितः ।
इति मनसि यः काव्यारंभे कवेर्भवति श्रमः
स नयनजलो रोमोद्भेदः सतां तमपोहति ॥ ३ ॥

निर्गम्यतां बकविडालसमप्रचारै-
राद्यैश्च राजसचिवैः शमवृत्तिभिश्च ।
तिष्ठन्तु डिण्डिकविनर्मकलाविदग्धा
निर्मक्षिकं मधु पिपासति धूर्तगोष्ठी ॥ ४ ॥

कुतः— न प्राप्नुवन्ति यतयो रुदितेन मोक्षं
स्वर्गायतिं न परिहासकथा रुणद्धि ।
तस्मात्प्रतीतमनसा हसितव्यमेव
वृत्तिं बुधेन खलु कौरुकुचीं विहाय ॥ ५ ॥

को नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । (कर्णं दत्वा) हन्त! विज्ञातम । एष हि स विटमण्डपः । (प्रविश्य) धूर्तचाक्रिकः खलतिश्यामिलको घण्टामाहत्य घोषयति । य एषः—

व्यतिकरसुखभेदः कामिनीकामुकानां
दिवससमयदूतो दुन्दुभीनां पुरोधाः ।
कलमुषसि खरत्वादस्य कण्ठा (घंटा) रवाणां
बलवदभिनदन्तो गर्दभा नानुयान्ति ॥ ६ ॥

किन्नु तावदनेन घुष्यते? (कर्णं दत्वा) (नेपथ्ये)

जयति मदनस्य केतुः कान्तं प्रत्युद्यतो विलासिन्याः ।
शिरसा प्रार्थयितव्यः सालक्तकनूपुरः पादः ॥ ७ ॥

(निष्क्रान्तः)

स्थापना ।

(ततः प्रविशति विटः)

वि— मा तावद्भोः किमत्र घोषयितव्यम्? यदेवं—

प्रणयकलहोद्यतेन स्रस्तांशुकदर्शितोरुमूलेन ।
जितमेव मदकलाया नूपुरमुखरेण पादेन ॥ ८ ॥

अये केनैतद्धसितम्? (विलोक्य) दद्रुणमाधवोऽयमत्रैव । अयो! दद्रुणमाधव किमत्र हास्यस्थानम्? किं ब्रवीषि— "प्रत्यक्षं हि मे तव यदतीतेऽहनि तत्रभवत्या सुराष्ट्राणां वारमुख्यया समदनया मदनसेनिकया तत्रभवान् स्तौण्डिकोकिर्विष्णुनागश्चरणकमलेन शिरस्यनुगृहीतः" इति । सुष्ठु खल्विदमुच्यते—

"एति जीवन्तमानन्दो नरं वर्षशतैरपि ।" इति । विष्णुनागोऽपि नामैवं सर्वकामिजनसाधारणं चरणताडनसंज्ञकं शिरस्यभिषेकं प्राप्तवान् । किं ब्रवीषि— "कुतोऽस्य तानि भागधेयानि? यः स ईदृशानां प्रणयकलहोत्सवानां पात्रं भविष्यति । स हि तस्या वेशदेवतायास्तं संमानविशेषमवमानं मन्यमानः क्रोधपारिप्लुत-रक्तनयनरागः प्रस्फुरितभ्रुकुटीवक्रं ललाटं कृत्वा शिरो विनिधूय दशनैरोष्ठमभिदश्य पाणिना पाणिमभिहत्य दीर्घं निश्वस्योक्तवान् । 'हा धिक् पुंश्चलि अनात्मज्ञे यथा त्वया ममास्मिन्

प्रयतकरया मात्रा यत्नात्प्रबद्धशिखण्डके
चरणविनते पित्राघ्राते शिशुर्गुणवानिति ।
स कुसुमलवैः शान्त्यंभोभिर्द्विजातिभिरुक्षिते
शिरसि चरणो न्यस्तो गर्वान्न गौरवमीक्षितम्' ॥ ९ ॥

एवमानेनोक्ता विरज्यमानसन्ध्यारागेव रजनी वर्णान्तरमुपगता । अतिप्रभातचन्द्रनिष्प्रभं वदनमुद्वहन्ती

व्यपगतमदरागा भ्रश्यमानोपचारा
किमिदमिति विषादात्स्विन्नसर्वाङ्गयष्टिः ।
भयविगलितशोभा वान्तपुष्पेण मूर्ध्ना
न पुनरिति वदन्ती पादयोस्तस्य लग्ना ॥ १० ॥

प्रणिपातावनता चानेन निर्धूयोक्ता 'चण्डि माऽस्पाक्षीः, कर्दनेन

न मां ढौकितुमर्हसि' इति" इति । कष्टं भोः कोकिला खलु कौशिकमनुवर्तते । मदनसेनिकापि तं पुरुषवेतालं कदर्थमपवीर्यमनुवर्तेत इति मे विस्मयः । भवति च पुनर्महामात्रपुत्रो राज्ञः शासनाधिकृत इति न दानकामाऽपेक्षन्ते (ते) । शब्दकामाः खल्वेता भवन्ति । कामे हि प्रयोजनमनेकविधमित्युपदिश्यते । किं ब्रवीषि—"लब्धं खलु शब्दकामया शब्दप्रधानार्जनाच्छब्दस्य व्यसनं" इति । सा हि तपस्विनी

तिर्यक्त्रपावनतपक्ष्मपुटप्रवान्तै-
धौताधरस्तनमुखी नयनांबुपातैः ।
स्वांगेष्वलीयत नवैः सहसा स्तनद्भि-
रुद्वेजिता जलधरैरिव राजहंसी ॥ ११ ॥ इति ।

न च भोश्चित्रमिदं श्रोतव्यं श्रुतम् । न च खल्वस्माभिर्विदितार्थैरप्यतीतं पृष्टम् । ततस्ततः । किं ब्रवीषि— "ततः स मया निर्भर्त्स्योक्तः 'अये वैय्याकरणखसूचिन् सुमनसो मुसलेन मा क्षौत्सीः वल्लकीमुल्मुकेन मा वादीः वाक्क्षुरेण किसलयश्रीबां मा लौत्सीः मत्तकाशिनी' इति । एवमुक्तो मामनादृत्य विटमहत्तरं भट्टिजीमूतगृहं गतः । ततः सा तपस्विनी करकिसलयपर्यस्तकपोलमाननं कृत्वा प्ररुदिता । तत उत्थाप्य मयोक्ता— 'सुन्दरि न वानरो वेष्टनमर्हति गर्दभो वा वरप्रवहणं वोढुम् । अलमलं रुदितेन । हास्यः खल्वेष तपस्वी । नैवं महान्तं शिरःसत्कारमर्हति ।

किं कामी न कचग्रहैर्यमबलाः क्लिश्यन्ति मत्ता बला-
द्यं बध्नन्ति न मेखलाभिरथवा न घ्नन्ति कर्णोत्पलैः ।
पक्षे तस्य तु मन्मथः सुकृतिनस्तस्योत्सवो यौवनं
दासेनेव रहस्यपेतविनयाः क्रीडन्ति येनांगनाः' ॥ १२ ॥

एवञ्चोक्ता स्मितपुरस्सरमपांगेन मे वचः प्रतिगृह्य सशिरः-पादमवकुण्ठ्य वाससा शयनतलमलंकृतवती । अहमपि कामिप्रत्यवरस्य दुश्चरितमनुचिन्तयन् प्रभातमिति राज्ञः प्राभातनान्दीस्वनैरुत्थापितः कृतकर्तव्यस्तदेव दुःस्वप्नदर्शनमिवापनेतुं ब्राह्मणपीठिकां गतः । तस्यां ब्राह्मणपीठिकायां पूर्वगतं कीर्णकेशं विष्णुनागमेवार्तरूपमात्मकर्माचक्षाणं 'असावहं भोः एवंकर्मा । तं मा वृषल्याः पादवधूतशिरस्कं त्रातुमर्हन्ति त्रैविद्यवृद्धाः' इत्युक्तवन्तमपश्यम् । एवञ्चोक्ता ब्राह्मणाश्चलकपोलसूचितहासमन्योऽन्यमवलोक्य मुहूर्तमिव ध्यात्वोक्तवन्तः । 'भोः साधो अवलोकितान्यस्माभिर्मनुयमवसिष्ठगौतमभरद्वाजशंखलिखितापस्तम्बहारीतप्रचेतोदेवलवृद्धगार्ग्यप्रभृतीनां मनीषिणां धर्मशास्त्राणि । नैवंविधस्य महतः पातकस्य प्रायश्चित्तमवगच्छामः' इति । एवञ्चोक्तो विषण्णतरवक्त्र उच्छ्रूय हस्तावुपाक्रोशत । 'भो भोः चतुर्थो वर्ण इति न मामर्हथ भूमिदेवाः परित्यक्तुम् । कुतः —

आर्योऽस्मि शुद्धचरितोऽस्मि कुलोद्गतोऽस्मि
शब्दे च हेतुसमये च कृतश्रमोऽस्मि ।
राज्ञोऽस्मि शासनकरो न पृथग्जनोऽस्मि
त्रायध्वमार्तमगतिं शरणागतोऽस्मि ॥ १३ ॥

एवञ्चोक्तायां तस्यां परिषदि —

कैश्चिद्धौरयमित्यरालचलनैरन्योऽन्यमाघट्टितं
स्यादुन्मत्त इति स्थितं स्मितमुखैः कैश्चिच्चिरं वीक्षितम् ।
कैश्चित्कामपिशाच इत्यपि तृणं दत्त्वान्तरे धिक्कृतं
कैश्चिद्दुष्कृतकारिणीति च पुनः सैवांगना शोचिता ॥ १४ ॥

एवमवस्थायाञ्च संसदि तस्यां प्रतिपत्तिमूढेषु ब्राह्मणेषु प्रायश्चित्तविप्रलंभविक्लवे क्रोशति विष्णुनागे तेषामेकतम आचार्यपुत्रः स्वयञ्चा-

चार्यो दण्डनीत्यान्वीक्षिक्योरन्यासु च विद्यास्वभिविनीतः कलास्वपि च सर्वासु परं कौशलमनुप्राप्तो वाग्मी चान्तेवासिगणपरिवृतः परिहासप्रकृतिः शाण्डिल्यो भवस्वामी नाम ब्राह्मणः सव्येतरं हस्तमुद्यम्य स्मितोदग्रया वाचा परिषदमामन्त्र्योक्तवान् 'अये भो विष्णुनाग न भेतव्यम् अलमलं विषादेन । अस्तीदं धर्मवचनं 'यथादेशजातिकुलतीर्थसमयधर्माश्चाम्नायैरविरुद्धाः प्रमाणं' इति । अतो विटजातिं सन्निपात्य विटमुख्येभ्यः प्रायश्चित्तं मृग्यताम् । ते हि त्वामस्मात्किल्बिषान्मोचयिष्यन्ति' इत्युक्ते साधुवादानुयात्रमूर्ध्वाङ्गुलिप्रनृत्तमवर्तत तस्यां परिषदि । तच्छ्रुत्वा विष्णुनागोऽप्यनुगृहीत इति प्रस्थितः । त्वमपि विटसन्निपातकर्मणि नियुक्तः' इति बाढम् । किं ब्रवीषि— 'के पुनरिह भवतो विटसम्म (भि) ताः' इति ननु भवानेव तावदग्रे विटः । किं ब्रवीषि — 'कथमहमपि नाम विटशब्देनानुगृहीतः' इति । कः संशयः श्रूयतां—

> दिवसमखिलं कृत्वा वादं सह व्यवहारिभि-
> र्दिवसविगमे भुक्त्वा भोज्यं सुहृद्भवने क्वचित् ।
> निशि च रमसे वेशस्त्रीभिः क्षिपस्यपि चायुधं
> जलमपि च ते नास्त्यावासे तथापि च कत्थसे ॥ १५ ॥

तत्कथं त्वमविटः? किं ब्रवीषि — 'यद्येवमनुगृहीतः सन्निपातयिष्यसि विटान् विटलक्षणं तावच्छ्रोतुमिच्छामः' इति । तत्प्रथमः कल्पः । श्रूयतां—

> स्वैः प्राणैरपि विद्विषः प्रणयिनामापत्सु यो रक्षिता
> यस्यार्तौ भवति स्व एव शरणं खड्गद्वितीयो भुजः ।
> संघर्षान्मदनातुरो मृगयते यं वारमुख्यो जनः
> स ज्ञेयो विट इत्यपात्रनभनो यो नित्यमेवार्थिषु* ॥ १६ ॥

अपि च,

> चरणकमलयुग्मैरर्चितं सुन्दरीणां
> समकुटमिव तुष्ट्या यो बिभर्त्युत्तमाङ्गम् ।
> स विट इति विटज्ञैः कीर्त्यते यस्य चार्थान्
> सलिलमिव तृषार्ताः पाणियुग्मैर्हरन्ति ॥ १७ ॥

किं ब्रवीषि— 'उक्तं विटलक्षणं विटानिदानीमुपदेष्टुमर्हसि' इति । श्रूयतां — तत्रभवान् कामचारो भानुः लोमशो गुप्त अमात्यो विष्णुदासः शैव्य आर्यरक्षितो दाशेरको रुद्रवर्मा आवन्तिकः स्कन्दस्वामी हरिश्चन्द्रो भिषक् आभीरकः कुमारो मयूरदत्तो मार्दंगिकः स्थाणुर्गांधर्वसेनक उपायनिरिन्तकथः पार्वतीयः प्रथमोऽपरान्ताधिपतिरिन्द्रवर्मा आनन्दपुरतः कुमारो मखवर्मा सौराष्ट्रिको जयनन्दको मौद्गल्यो दयितविष्णुरित्येवमादयो यथासंभवं सन्निपात्याः । किं ब्रवीषि— "सर्वं तावत्तिष्ठतु । दयितविष्णुरपि भवतो विटसंमतः" इति । कः सन्देहः । किं ब्रवीषि— "एष योऽयं राज्ञो बलेष्वधिकृतः पारशवः कविः" इति । बाढमेवमेवैतत् । किं ब्रवीषि— "मा तावद्भोः—

> यः संकुचत्युपहितप्रणयोऽपि राज्ञो
> यो मङ्गलैः स्वपिति च प्रतिबुध्यते च ।
> देवार्चनादपि च गुग्गुलुगन्धवासा
> योऽसौ किणत्रयकठोरललाटजानुः ॥ १८ ॥

अपि च,

> देवकुलाद्राजकुलं राजकुलाद्याति देवकुलमेव ।
> इति यस्य यान्ति दिवसाः कुलद्वये संप्रसक्तस्य ॥ १९ ॥

कथमसावपि विटः" इति । आ एवमेतत् । अस्तीदमस्य विटसंवादप्रत्यनीकभूतम् । किन्तु

पूर्वावन्तिषु यस्य वेशकलहे हस्ताग्रशाखा हृता
सक्थ्नोः संयति यस्य पद्मनगरे द्विड्भिर्निखाताविषू ।
बाहू यस्य विभिद्य भूरधिगता यन्त्रेषुणा वैदिशे
यो वाजीकरणार्थमुज्झति वसून्यद्यापि वैद्यादिषु ॥ २० ॥

यस्माद्ददाति स वसूनि विलासिनीभ्यः
क्षीणेन्द्रियोऽपि रमते रतिसंकथाभिः ।
तस्माल्लिखामि धुरि तं विटपुङ्गवानां
रागो हि रंजयति वित्तवतां न शक्तिः ॥ २१ ॥

कथमसाववविटः? किं ब्रवीषि– "एष चेदग्रणीर्विटानां" इति । तस्मादेवायं धुरि लिखितः । गच्छतु भवान । स्वस्ति भवते । साधयामस्तावत् । (परिक्रम्य)

एषोऽस्मि नगररथ्यामवतीर्णः । अहो नु खलु जम्बूद्वीपतिलकभूतस्य सर्वरणाविष्कृत (रत्नालंकृत) विभूतेः सार्वभौमनरेन्द्राधिष्ठितस्य सार्वभौमनगरस्य परा श्रीः । इह हि —

संगीतैर्वनिताविभूषणरवैः क्रीडाशकुन्तस्वनैः
स्वाध्यायध्वनिभिर्धनुस्स्वनयुतैः मुनासिशब्दैरपि ।
पात्रीणां गृहसारसप्रतिरुतैः कक्ष्यान्तरेषु स्वनैः
संजल्पानिव कुर्वते व्यतिकरान्प्रासादमालाः सिताः ॥ २२ ॥

अपि च,

गिरिभ्यो द्वीपेभ्यः सलिलनिधिकच्छादपि मरो-
र्नरेन्द्रैरायातैर्दिशि दिशि निविष्टैश्च शतशः ।
विचित्रामेकस्थामनवगतपूर्वामिव कथा-
मिह स्पष्टुः सृष्टेर्बहुविषयतां पश्यति जनः ॥ २३ ॥

शकयवनतुषारपारसीकैर्मगधकिरातकलिंगवंगकाशैः ।
नगरमतिमुदायुतं समन्तान्महिषकचोळकपाण्ड्यकेरळैश्च ॥ २४ ॥

(विलोक्य) अये को नु खल्वेषोऽवमुक्तकञ्चुकतया धवलशिबिकयेभ्यविधवालीलां विडंबयन्नित एवाभिवर्तते । (विमृश्य) भवतु विज्ञातं । एष हि स वेत्रदण्डकुण्डिकाभाण्डसूचितो वृषलचौक्षामात्यो विष्णुदासः । अनेन ह्येवं महत्यपि प्राड्विवाककर्मणि नियुक्तेन ध्यानाभ्यासपरवत्तयोपेक्षाविहारिणेव भिक्षुणा नात्यर्थं राजकार्याणि क्रियन्ते । तथा हि—

करविचलितजानुः कैश्चिदर्धासनस्थैः
समवनतशिरोभिः कैश्चिदाकृष्टपादः ।
अधिकरणगतोऽपि क्रोशतां कार्यकाणां
विपणिवृष इवैषो ध्याति निद्रां च याति ॥ २५ ॥

तत्कामं विट्जनप्रत्यनीकभूतमस्य दर्शनम् । तथापि धर्ममुपदिशन्नभिगम्य एव । उपसर्पाम्येनम् । एष खलु दूरादेव मामवलोक्य शिविकामवतार्यावतरति । अये भोः मर्षयतु भवान् । नार्हस्यस्मानुपचारयन्त्रणया जनीकर्तुम् । किं ब्रवीषि— "कश्च भवन्तमुपचरति? आचारोऽयमस्माभिरनुवर्त्यते" इति । मातावृद्धोः एवमुपचरता युक्तं नाम भवतीमनङ्गसेनामिह प्रणयाभिमुखीं तथा विमुखयितुम् । किं ब्रवीषि— "किं मया न तस्याः प्रणयानुरूपः सम्परिग्रहः कृतः? पश्यतु भवान् । सा हि मया—

स्वस्तीत्युक्त्वा वन्दनायां कृतायामासीनायां याचितं योगशास्त्रम् ।
नेत्रे चास्या वायुनेवेर्यमाणे संप्रेक्ष्योक्ता पुलिसर्पिं पिबेति ॥ २६ ॥

तत्कथं न संप्रतिगृहीता मया" इति । अहो कामिन्याः सललि-

तसम्परिग्रहः कृतः एष मां प्रहस्य चौक्षोपायनेन बीजपूरकेण प्रसादयति। अये भो युष्मदन्तेवासिन एव वयमीदृशेषु प्रयोजनेषु नोत्कोट (च) नाभिविश्वयितुं शक्याः। सर्वथाऽद्यप्रभृत्येवास्तु भवान्। साधयामस्तावत्। (परिक्रम्य)

एष भोः अनेकदेशस्थलजजलजसारफल्गुपण्यक्रयविक्रयोपस्थितस्त्रीपुरुषसंबाधान्तरापणां सार्वभौमस्य विपणिमनुप्राप्तः। अहो! बतास्याः—

शकुनीनामिवावासे प्रचारेषु गवामिव।
जनानां व्यवहारेषु सन्निपातो (ते) महाध्वनिः ॥ २७॥

तथा हि—

स्वरः सानुस्वारः परिपतति कर्म्मारविपणौ
भ्रमारूढं कांस्यं कुररविरुतानीव कुरुते।
धृ (दु, धु) तं शंखे (के) शस्त्रं रसति तुरगश्वासपिशुनं
समन्ताच्चाप्नोति क्रयमपि जनो विक्रयमपि ॥ २८ ॥

अपि चेदानीं—

सुमनस इमा विक्रीयन्ते हसन्त्य इव श्रिया
चरति चषकः पानागारेष्वतः परिपीयते।
करधृतःतृणैर्मांसक्रायैरपांगनिरीक्षिता
नगरविहगाः सूनामेते पतन्त्यसिमालिनीम् ॥ २९ ॥

अपि च,

अंसेनांसमभिघ्नतां विवदतां तत्तच्च संक्रीणतां
सस्यानामिव पंक्तयः प्रचलतां नृणाममीराशयः।
द्यूतादाहृतमाषकाश्च कितवा वेशाय गच्छन्त्यमी
संप्राप्ताः परिचारकैः सकुसुमैः सापूपमांसासवैः ॥ ३० ॥

यावदहमपीदानीं महाजनसंमर्ददुर्गमं विपणिमार्गमुत्सृज्येमां पुष्पवीथिकामन्तरेण पानागाराण्यपसव्यमुपावर्तमानः पूर्णभद्रशृङ्गाटकमवतीर्य मकररथ्यया वेशमार्गमवगाहिष्ये । तत्काममसंगृहीतमाषस्य वेशप्रवेशो निरायुधस्य संग्रामावतरणमित्युभयमपार्थकं केवलमयशसे चानर्थाय च । किन्तु सुहृन्निदेशोऽयमस्माभिरवश्यं निर्वर्तयितव्यः । भूयान् वेशे विटसंनिपातः । (परिक्रम्य)

अये को नु खल्वेष रोहितकीयैर्मार्दङ्गिकैः कांस्यपत्रवेणुमिश्रैर्यौधेयकवर्णैरुपगीयमानः एकश्रवणावलंबितकुरंटकशेखरो विरलमपसव्यमाकुलदशमुत्तरीयमपवर्तिकया संक्षिपन्मुहुर्मुहुः प्रकटं कस्फिक् सव्येन पाणिना मद्यभाजनमुत्क्षिप्य नृत्यन्नापानमण्डपं हासयति । (निर्वर्ण्य) आः ज्ञातम् । एष हि सत्राहिलकपुत्रः सर्वधूर्तपरिहासैकभाजनभूतो वेशकुक्कुटो बाष्पो धान्वः । भो यत्सत्यं न कदाचिदप्येनममत्तमपीतं वा पश्यामि मत्रायममुंक्षित हस्तो माषकार्धेनापि । तत्कुतोऽस्यैतदुपपद्यते । (वितर्क्य) हन्त विज्ञातम् । एष हि पुरोभागी लज्जावियुक्तः सर्वकपः सार्वजनीनत्वात् —

आबद्धमण्डलानां पिबतामुपदंशमुष्टिमादाय ।
प्रविशति बाष्पो मध्यं नटनटीचेटाश्च बन्धानां ॥ ॥ २१ ॥

अहो नु खल्वस्य पानोपार्जने विज्ञानम् । तदलमनेनाभिभाषितेन । इतो वयं (परिक्रम्य) इदमपरं जङ्गमं जीर्णोद्यानं विटजनस्य । एषा हि पुराणपुंश्चली सरणिगुप्ता नाम कामदेवायतनाद् देवतायाउपयाचितमभिनिर्वर्त्य स्फुटितकाशवल्लरीश्वेतमागलितमंसदेशादुपरि केशहस्तमुपन्यस्यन्ती सद्योधौतनिवसना विगलितमुत्तरीयमेकांसे प्रतिसमादधाना बलिविक्षेपोपनिपतितैर्बलिभृतैः परिवृतं मयूरं नृत्यन्तमपाङ्गेनावलोकयन्ती मकरयष्टिं प्रदक्षिणीकरोति । भोः यत्सत्यमद्याप्यस्याश्चिरातिक्रान्तं यौवनविभ्रमं विलासशेषं कथयति । तथाहि —

श्वेताभिर्नखराजिभिः परिवृतौ व्यावृत्तमूलौ स्तनौ
सृक्किण्योः शिथिलश्च मध्यगडुलो निष्पीतपूर्वोऽधरः ।
सभ्रूक्षेपमुदाहृतः परिचयाद्यापि युक्तोऽन्तरः
रूपं हि प्रहृतं प्रसह्य जरया नास्या विलासा हृताः ॥ ३२ ॥

तन्न शक्यमेनामनभिभाष्यातिक्रमितुम् । एषा ह्यस्माकं प्रियवयस्यमार्दीगेकं स्थाणुमित्रं मित्रं व्यपदिशन्ती कौश्वरसायनोपयोगमात्मनः प्रकाशयति । तत्कथमेनामुपसर्पामि । (विचिन्त्य) आ ज्ञातम् । अस्या हि इतस्तृतीयेऽहनि तपस्वी स्थाणुमित्रश्चुम्बनातिप्रसङ्गात्तथा बीभत्समनुभूतवान् । अहो धिगकरुणो रागः --

चुंबनरक्तं सोऽस्या दशनं च्युतमूलयात्मनो वदने ।
जिह्वामूलस्पृष्टं खादिति कृत्वा निरष्ठीवत् ॥ ॥ ३३ ॥

तत्कामं वेशमवतितीर्षुस्तीर्थमतिक्रामन्वञ्चितः स्याम् । अथवा, आविष्कृतं स्यात् स्थाणुमित्रवदने दन्तनिपतनम् । तन्नाभिगमनेन व्रीळां पुनरुक्तीकरोमि । सर्वथा नमोऽस्यै । साधयामस्तावत् । (परिक्रम्य)

एषोऽस्मि वेशमवतीर्णः । अहो तु वेशस्य परा श्रीः । इह हि --- एतानि पृथक्पृथङ्निविष्टानि रुचिरवप्रनेमिसालहर्म्यशिखरकपोतपाळीसिंहकर्णगोपानसीवलभीपुटाट्टालकावलोकनप्रतोलीविटङ्कप्रासादसम्बाधानि असम्बाधकक्ष्याविभागानि भागे निर्मितानि सुनिर्मितरुचिरखातपूरितसिक्तसुषिरफूत्कृतोत्कोटितलिप्तलिखितसूक्ष्मस्थूलविविक्तरूपशतानिबद्धानि बन्धसन्धिद्वारगवाक्षवितर्दिसंजवनवीथीनिर्व्यूहकानि एकद्वित्रिपादपालंकृतमाध्यकोद्देशानि उद्देश्यवृक्षकहरितकफलमाल्यषण्डमण्डितानि पुण्डरीकशबलितविमलवापीतोयानि तोयान्तरविहितदारुपर्वतकभूमिलतागृहचित्रशालालंकृतानि परार्ध्यमुक्ताप्रवाळकिङ्किणीजालाविष्कृतपरिपुष्कराणि उच्छ्रितसौभाग्यवैजयन्ती-

पताकानि उत्पतन्तीव गगनतलमवनितलात् भवनवरावतंसकानि वार-मुख्यानाम् । यथैते —

> आसीनैरवलीढचक्रवलयैर्मीलद्भिरावन्तिकै
> र्धौर्यारूढकिरातसंगतधुरास्तिष्ठन्ति कर्णीरथाः । (?)
> एते च द्विगुणीकृतोत्तरकुथा निद्रालसाधोरणाः
> काम्बोजाश्च करेणवश्च कथयन्त्यन्तर्गतान् स्वामिनः ॥३४॥

अपि चास्मिन्नुद्देशे—

> नयनसलिलैर्यैरेवैको व्रजन्नतिवाह्यते
> प्रततविसृतैस्तैरेवान्यो गृहानपि नीयते ।
> अकृशविभवेष्वासामास्था तथापि कृतव्ययाः
> सपत्नुपतिता निर्भर्त्स्यन्ते बलात्किल मातृभिः ॥ ३५ ॥

(परिक्रम्य)

१. इयमनुनयति प्रियं क्रुद्धमेषा प्रियेणानुनीता प्रसीदत्यसौ सततन्त्रीभिर्वर्धयन्ती कलं काकलीपञ्चमप्रायमुत्कण्ठिता वल्गुगीता-पदेशेन विक्रोशति ॥

२. इयमुपाहितदर्पणा कामिना मण्ड्यते कामिनी कामिनो मौलिमेषा निबध्नात्यसौ शारिकां स्पष्टमालापयत्येष मत्तो मयूरोऽनया चूतपुष्पेण सन्तर्जितो नृत्यति ॥

३. कथमियमतिकन्दुकक्रीडया मध्यमायासयत्यल्पमेषा प्रियेणोपविष्टा सहाक्षैः परिक्रीडति प्रौढया चानयैतत्स्वयं लिख्यते चित्र-माख्यायिकासौ पुनर्वाच्यते ॥

४. अलमलमतिसंभ्रमेणाश्वतां वासुभद्रे चिराद्दृश्यसे किं प्र-वीष्य"द्य तं प्रष्टुमर्हस्यहं येन मुग्धातथावञ्चिते"ति प्रसाद्यासि नः स्व-स्तिते तत्तथा साधयामो वयम् ॥ (परिक्रम्य) इदमपरं सुहृत्पत्तनमुप-

स्थितम्। एष हि स बाल्हिकः काङ्कायनो भिषगीशानचन्द्रः हरिश्चन्द्रश्चन्द्र इव कुमुदवापीं वेशवाटीमवभासयन्नित एवाभिवर्तते । तत् किमस्येह प्रयोजनम् । (विचिन्त्य) आ ज्ञातं एष हि तस्याः पूर्वप्रणयिन्या यशोमत्या भगिनीं प्रियंगुयष्टिकां कामयते । अस्मानपि रहस्येनातिसन्धत्ते । तन्नशक्यमेनमप्रतिपद्य गन्तुम् । यावदुपसर्पामः । (उपगम्य) अयो वेशबिसवनैकचक्रवाक कुतो भवान् । किं ब्रवीषि—"एष हि तस्याः प्रियसख्यास्ते कनीयसीं प्रियंगुयष्टिकामौषधेन संभाव्यागच्छामि" इति । न खलु तस्याः सुरतसुभिक्षाया अनामयात्रसन्नो मदनाग्निसंस्यदीपनीयकमुपदिष्टवानासि । किं ब्रवीषि—"मुक्तः परिहासः कष्टा खलु तस्याः शिरोवेदना" इति । वयस्य सत्यं । किं ब्रवीषि—"कः सन्देहः, कृच्छ्रसाध्या" इति । एवमेतत् । शिरोवेदना नाम गणिकाजनस्य लक्षण्याधियौतकम् । पश्यतु भवान्—

ललाटे विन्यस्य क्षतजसदृशं चन्दनरसं
मृणालैः क्रीडन्ती कुवलयपलाशैः सकमलैः ।
सलीलं भ्रूक्षेपैरनुगतसुखप्राश्निककथा
विरक्ता रक्ता वा शिरसिरुजमाख्याति गणिका ॥ ३६ ॥

किं ब्रवीषि—"सदापि नाम त्वं कर्कशपरिहासः । एष खलु तामौषधं प्रपाय्यागच्छामि" इति । युक्तमेतत् । असंशयं हि—

धून्वन्त्याः करपल्लवं वलयिनं घ्नन्त्याः पदा कुट्टिमं
विभ्रान्त्या (त्या) श्च्युतमंशुकं सरशनं नाभेरधः पाणिना ।
तस्या दीर्घतरीकृताक्षमपिबः केशग्रहैराननं
बाला त्वद्दशनच्छदौषधमलं सात्रा त्वया पायिता ॥ ३७ ॥

किं ब्रवीषि— "वयस्य एव तथा विनाशयति" इति । चोर यदि न पुनरस्मान्रहस्येनावक्षेप्स्यसि । किन्त्वद्य सर्वविटैः सर्वविटमहत्तरस्य भ-

द्विजीमूतस्य गृहे केन चित्प्रयोजनेन सन्निपतितव्यम् । तद्वयस्योऽप्यर्ही-नकालमागच्छेत् । किं ब्रवीषि — " विदितमेवैतद्विटजनस्य यथा विष्णु-नागप्रायश्चित्तदानायापराह्णे समागन्तव्यमिति । तद्गच्छतु भवान् । अह-मप्यागच्छामि" इति । तथा नाम । स्वस्ति भवते । साधयामस्तावत् । (परिक्रम्य) कथमिदं सर्वविटैर्विदितम् । तेनह्यल्पपरिश्रमोऽस्मि संजा-तः । केवलं वेश्यासुहृत्समागमैः कालोऽनुपालयितव्यः । अये कस्य खल्वयमहूणो हूणमण्डनमण्डितः आर्यघोटकः पाटलिपुत्रिकायाः पुष्पदास्या भवनद्वारमाविष्करोति ! (निर्वर्ण्य) आ ज्ञातं एभिरिहावद्ध-श्वेतकाम्रकार्णिकाप्रहसितकपोलदेशैर्बद्धकैरसज्जमध्यसक्तसज्जमितिसांज - लि प्रतिवादिभिर्ललाटडिण्डिमैः सूचितः सेनापतेः सेनकस्यापत्यरत्नं भट्टिमघवर्मा भविष्यति । तन्नशक्यमेन मनभिभाष्यातिक्रमितुम् । अतिक्रमन् हि स्नेहमाध्यस्थ्यं दर्शयेयम् । यावदेनमुपसर्पामि । (उपेत्य) भोः कः सुहृद्गृहे (कर्णं दत्वा) एष खलु भट्टिमघवर्मा मा-माह्वयति । किं ब्रवीषि— " वयस्य किमद्याप्यपूर्वप्रतीहारोपस्थानेन चिरोत्सन्नो राजभावोऽस्मास्वाधीयते । स्थीयतां मुहूर्तम् । आग-च्छामि" इति । सखे स्थितोऽस्मि । (विलोक्य) इत इतो भवान् । एष खलु पुलिनावतीर्णवृषभमदोद्धुरणस्खलैश्चरणपदविन्यासैर्भवनकक्ष्या-मलं कुर्वन्निव एवाभिवर्तते भट्टिः । अहो नु खल्वस्य विलासेऽभ्यासः । वेशो विलास इत्युपपन्नमेतत् । अपि च —

विलोलभुजगामिना रुचिरपीवरांसोरसा
विलासचतुरभ्रुवा मुहुरपाङ्गविप्रेक्षिणा ।
अनेन हि नरेन्द्रसद्म विशता पदैर्मन्थरै-
रवीणममृदङ्गमेकनटनाटकं नाट्यते ॥ २८ ॥

यावदेन मालपामि । भट्टिमघवर्मन् किमयमतिदिवाविहारेण सुहृज्जन उत्कण्ठ्यते । साधु मुहूर्तमपि तावद्युष्मद्दर्शनेनानुगृह्येत । एष खलु

विहसन्नाकुलापसव्यपरिधानं श्वासविषमिताक्षरं स्वागतमित्यंजलिना-ऽभ्युपैति । भो यद्येतावदनेनाद्यैव पुष्पदासी पुष्पवतीति महामात्रगता, तथापि कथमुपभुक्तैव । (विचिन्त्य) लाटडिंडिनो नामैते नातिभिन्नाः पिशाचेभ्यः । कुतः ? सर्वो हि लाटः—

नग्नः स्नाति महाजनेऽभसि सदा नेनेक्ति वासः स्वयं
केशानाकुलयत्यधौतचरणः शय्यां समाक्रामति ।
यत्तद्भक्षयति व्रजन्नपि पथा भग्ने पटं पाटितं
छिद्रं चापि सकृत्प्रहृत्य सहसा लाट (लोल) श्चिरं कत्थते ॥ ३९

सर्वथा कृतमनेन स्वदेशौपयिकम् । मातावद्धोः—

अविचिन्त्य फलं वल्यास्त्वया पुष्पवधः कृतः ।

किं ब्रवीषि— "कथं" इति ।

इदं हि रजसाध्वस्तमुत्तरीयं विलोक्यताम् ॥

किं ब्रवीषि— "शय्यान्तावलंबितं तांबूलावसिक्तमेतदवगच्छामि" इति। मातावत् । इदं क्षुद्रमुक्ताफलावकीर्णमिव ललाटं स्वेदबिन्दुभिः किमिति वक्ष्यति । एष पार्श्वमपधायोच्चैः प्रहसितः । हन्त जघन्यकामुक कथमनयाच्छलितः । किं ब्रवीषि — "क च्छलितो नाम, ननु गृहीतोऽस्मि । श्रूयताम् । सा हि —

विपुलतरललाटा संयताग्रालकत्वात्
रुचिरजघनभारा वाससार्धोरुकेण ।
विगततनुरपोढप्रागलंकारभारा
कथय कथ मगम्या पुष्पिता स्त्री लता स्यात् ॥ ४० ॥

अपि च, श्रोतुमर्हति भवान् —

पार्श्वावर्तितलोचना नखपदान्यालोकयन्ती मया
दृष्टा चेषदवाङ्मुखी स्वभवनप्रत्यातपेऽवस्थिता ।

संगृह्याथ करद्वयेन कठिनावुत्कंपमानौ स्तनौ
प्राविश्यान्तरगारमर्गळवता द्वारं करेणावृणोत् ॥ ४१ ॥

ततोऽहमनुद्रुतं प्रविश्य—

कचनिग्रहदीर्घलोचनां रभसावर्तितवलितस्तनीं ।
किमसीतिनहीतिवादिनीं समचुंबं सहसा विलासिनीं" ॥इति।

भोः चित्रः खलु प्रस्तावः । पृच्छामस्तावदेनां । ततस्ततः । किं ब्रवीषि— "अथ सखे

समुपास्थितस्य जघनं रशनात्यागाद्विविक्ततरबिंबम् ।
पाणिभ्यां व्रीळितया निमीलिते मेऽनया नयने" इति । ।४२॥

ह्री धिक्त्वामस्तु । अविकत्थन उद्वेजनीयोह्यसि । निन्द्यश्चार्यजनस्य संवृत्तः । किं ब्रवीषि—एव मय्यनुगृहीतोऽस्मि । न त्वया महाभारते श्रुतपूर्वं —

यस्यामित्रा न बहवो यस्मान्नोद्विजते जनः ।
यं समेत्य न निन्दन्ति स पार्थ पुरुषाधमः ॥ इति ४३ ॥

भो एतत्खलु डिण्डित्वं नाम । सर्वथापि साधु भोः प्रीतोऽस्मि भवतोऽनेन डिण्डित्वेन । सर्वथा विटेष्वाधिराज्यमर्हसि । अयमिदानीमाशीर्वादः—

किं ब्रवीषि "अवाहितोऽस्मि" इति । श्रूयताम् ॥

प्रभातमवगम्य पृष्ठमुपगृह्य सुप्तस्य ते
प्रगल्भमधिरुह्य पार्श्वमपवासलेकोरुणा ।
तथैव हि कचग्रहेण परिवृत्य वक्त्राम्बुजं
पिबत्वथ च पाययत्वधरमात्मनस्त्वां प्रिया ॥ ४४ ॥

एष खल्वनुगृहीतोऽस्मीत्युक्त्वा पलायते नमोऽस्तुभगवते । साधयामास्त्वावत् ॥ (परिक्रम्य)

अये का नु खल्वेषा स्वभवनावलोकन मप्सरा विमानमिवालङ्करोति ॥ एषा हि सा काशीनां वारमुख्या पराक्रमिका नाम सुखमतिपिञ्छोलया क्रीडन्ती रूपलावण्यविभ्रमैर्लोचनमनुगृह्णाति । आश्चर्यम् ॥

विरचितकुचभारा हेमवैकक्ष्यकेण
स्फुटविवृतनितम्बा वाससार्धोरुकेण ।
विचरति चलयन्ती कामिनां चित्तमेषा
किसलयमिव लोला चञ्चलं वेशवल्याः ॥ ४५ ॥

अपि च,

गण्डान्तागलितैककुण्डलमणिच्छायानुलिप्तानना
मन्वभ्यस्ततया हिकारपिशुनैः श्वासैरवाक्तालुभिः ।
पिञ्छोलाधरे निवेश्य मधुरामावादयन्तीमिमां
गण्डूकस्वनशङ्कितो गृहशिखी पर्येति वक्राननः ॥ ४६ ॥

किंनु खल्वस्या उदवसितादिन्द्रस्वामिनो रहस्यसचिवो हिरण्यगर्भको निष्पत्य इत एवाभिवर्तते । किमत्राश्चर्यम् । इन्द्रस्वामी हिरण्यगर्भको वेश इति संहितमिदं तन्त्रं तन्त्रेणेति । एष मामञ्जलिनोपसर्पति । हण्डे हिरण्यगर्भक किमिदं वेशदेवायतनमपरान्तपिशाचैर्विध्वंसयितुमिष्यते? किंब्रवीषि "एष खलु स्वामिनोऽस्मि विदेशरागेणैवं धुरि नियुक्तः । एषा हि पूर्वं पञ्चसुवर्णशतानि गणयति । अधुना सहस्रेणाप्युपनिमन्त्रितापि विनियुज्यमाना नैवशक्यते तीर्थमवतारयितुम् । तदर्हसि त्वमपि तावदेनां गमयितुम्" इति ॥

अत्यार्जवः खल्वसि । न हि शतसहस्रेणापि प्राणा लभ्यन्ते । किं ब्रवीषि । "किञ्चास्याः प्राणसन्देहे कारणमस्मासु पश्यसि" इति । आविष्कृतं हि तत्रभवत्या भर्तृस्वामिनश्चामरग्राहिण्या कुटङ्गदास्या स्वामिनः संसर्गात्तथाभूतं व्यसनमनुभूतम् । किं ब्रवीषि । "आलभस्व तावदिदं मे शरीरम् । सत्यमेवेदम्" इति । असत्येन न स्वामिनमेवं ब्रूयात् ॥

किं ब्रवीषि "चिराभ्यस्तमेवेदमस्मत्स्वामिपादानाम्" इति । अत एव न शक्यमन्यथाकारयितुं, नचैतदेवं, पश्यतु भवान् ॥

काव्ये गान्धर्वे नृत्तशास्त्रे विधिज्ञं
दक्षं दातारं दक्षिणं दाक्षिणात्यम् ।
वेश्या का नेच्छेत्स्वामिनं कोङ्कणानां
स्याचेदस्य स्त्रीष्वार्जवात्सन्निपातः ॥ ॥ ४७ ॥

अपि च

सञ्चारयन्कलभकं गजनर्तकं वा
वेश्याङ्गणेषु भगदत्त इवेन्द्रदत्तम् ।
उद्वीक्ष्यते स्तननिविष्टकराम्बुजाभि-
र्व्याघ्रो मृगीभिरिव वारविलासिनीभिः ॥ ॥ ४८ ॥

अपिचैषा भर्तुर्नोऽधिराजस्य स्यालं पारशवं कौशिकं सिंहवर्माणं मित्रमपदिशन्ती सर्वान्कामिनः प्रत्याख्यानेन व्रीलयति । किं ब्रवीषि "तस्यैषातिकामितयात्रमन्यते" इति । युष्मद्देशौपयिकमेव किल सततमतिसेवनम् ॥

किं ब्रवीषि "देशौपयिकमदेशौपयिकमिति नावगच्छामि । विस्पष्टम-
भिधीयताम्" इति ॥

एवमनुगृहीतः कथं न कथयिष्यामि । श्रूयताम्—

श्रवणनिकटजैर्नखावपातैः
वनगजदम्य इवाङ्कितः प्रतोदैः ।
विवृतजघनभूषणां विवस्त्रां
वृष इव वत्सतरीमिहोपयाति ॥ ॥ ४९ ॥

किं ब्रवीषि "तेन ह्यनेनैवोपायेनोपस्थास्यामि" इति ॥
यथैवमिन्द्रस्वामी विज्ञाप्यः—

दशनमण्डलचित्रककुन्दरां
दयितमाल्यनिवासितमेखलाम् ।
त्वदपरं प्रति सा जघनस्थलीं
न विवृणोति वृतापि शतं शनैः ॥ ॥ ५० ॥

स्वस्ति भवते । साधयामस्तावत् (परिक्रम्य)
अये को नु खल्वेषः शौर्पकारिकायाः शमदास्या भवनान्निष्क्रम्य डिण्डि-
गणपरिवृतो वेशमाविष्करोति । (विलोक्य) ॥ एतज्जङ्गमं
विटतीर्थमुदीच्यानां वाह्लीकानां कारूशमलदानां चेश्वरो म-
हाप्रतीहारो भद्रायुध एषः ॥

विरचितकुन्तलमौलिः श्रवणार्पितकाष्ठविपुलसितकलशः ।
जनमालपञ्जकारैरुन्मादयतीव लाटानाम् ॥ ५१ ॥

का च तावदस्य लाटेषु साधुदृष्टिः एतावत् । सर्वो हि लाटः

संवेष्ट्यद्वावुत्तरीयेण बाहू
रज्वा मध्यं वाससा सन्निबध्य ।

प्रत्युद्गच्छन् संमुखनिः शकारैः
पादापातैरंसकुब्जः प्रयाति । ॥ ५२ ॥

अपि च

उरसि कृतकपोतकः कराभ्यां
वदति जजेति यकारहीनमुच्चैः ।
समयुगलनिबद्धमध्यदेशो
व्रजति च पङ्कमिव स्पृशन्कराग्रैः ॥ ॥ ५३ ॥

सर्वथा नास्त्यपिशाचमैश्वर्यं । अथवास्यैवैकस्य देशान्तरविहारो यु : ।
कुतः ? ॥

येनापरान्तशकमालवभूपतीनां
कृत्वा शिरस्सु चरणौ चरता यथेष्टम् ।
कालेऽभ्युपेत्य जननीं जननीं च गङ्गां
आविष्कृता मगधराजकुलस्य लक्ष्मीः ॥ ॥ ५४ ॥

अपि च,

वेलानिलैर्मृदुभिराकुलितालकान्ता
गायन्ति यस्य चरितान्यपरान्तकान्ताः ।
उत्कण्ठिताः समवलंब्य लतास्तरूणां
हिन्तालमालिषु तटेषु महार्णवस्य ॥ ॥ ५५ ॥

किंतद्गीतम्

उहि माणुसोत्ति भट्टाउहेण ण विळिखइ आउहे असो ण्णारितस्सकम्म-
सिद्धिं विघ सुखलु भुजंति सोकरासिद्धिं ॥ इति ।

(परिक्रम्य)

ए: खलु प्रद्युम्नदेवायतनस्य वैजयन्तीमाभिलिखति । एतड्डिण्डित्वं नाम
भोः । डिण्डिनो हि नामैते नातिविप्रकृष्टा वानरेभ्यः । भोः किञ्च तावदस्य
डिण्डिकेषु प्रियत्वम् । डिण्डिनो हि नाम—

आलेख्यमात्मलिखिभिर्गमयन्ति नाशं
सौधेषु कूर्चकमषीमलमर्पयन्ति ।
आदाय तीक्ष्णतरधारमयोविकारं
प्रासादभूमिषु घुणक्रियया चरन्ति ॥ ॥ ५६ ॥

किं न्वतावदयं लिखति (विलोक्य)

निरपेक्ष इति । स्थाने खल्वस्येदं नाम । सुष्ठु खल्विदमुच्यते अर्थं नाम शीलस्यापहरतीति । तथा ह्येष धान्त्रस्तां नः प्रियसखीमनवेक्षया वेशतापसीव्रतेन कर्शयति । सा हि तपस्विनी—

नेत्राम्बु पक्ष्मभिरराऌघनासिताग्रैः
नेत्राम्बुधौतवलयेन करेण वक्त्रम् ।
शोकं गुरुं च हृदयेन समं बिभर्ति
त्रीणि त्रिधा त्रिवलिजिह्मितरोमराजिः ॥ ५७ ॥

तदुपालप्स्ये तावदेनम् । भो भागवन्निरपेक्ष करुणात्मकस्य भवतो मैत्रीमादाय वर्तमानस्य त्वयि मुदितायां योषिति युक्तमुपेक्षाविहारित्वम् ?

किं ब्रवीषि "गृहीतो वञ्चितकस्यार्थः । स्पृष्टोऽस्म्युपासकत्वेन । ईदृशः संसारधर्म इत्युक्तं तथागतेन" इति । मा तावद्भोः । तस्यामेव भगवतस्तथागतस्य वचनं प्रमाणं नान्यत्र ।

किंब्रवाषि "कुत्र वा कदा वा मम तथागतस्य वचनमप्रमाणम्" इति ॥ इयं प्रतिज्ञा ? किं ब्रवीषि "कः सन्देहः" इति । भद्रमुख श्रूयताम्—

श्रमनिस्सृतजिह्वमुन्मुखं
हृदि निस्सङ्गनिखातसायकम् ।
समवेक्ष्य मृगं तथागतं
स्मरसि त्वं न मृगं तथागतम् ॥ ५८ ॥

एष प्रहसितः । किं ब्रवीषि " न खलु तथागतशासनं शङ्कितव्यम् । अन्यद्धि शास्त्रमन्यथा पुरुषप्रकृतिः न वयं वीतरागाः" इति । यद्येवमर्हति भवांस्तत्रभवतीं राधिकां तथाभूतां शोकसागरादुद्धर्तुम् । किं ब्रवीषि "यदाज्ञापयति वयस्योऽयमञ्जलिः साधुमुच्येयम्" इति । सर्वथा दुर्लभस्ते मोक्षः किन्त्वियमाशीः प्रतिगृह्यताम् ॥

विप्रोष्यागत उत्सुकामवनतामुत्सङ्गमारोपय
स्कन्धे वक्त्रमुपोपधाय रुदतीं भूयस्समाश्वासय ।
आबद्धां महिषीविषाणविषमामुन्मुच्य वेणीं ततो
लंबं लोचनतोयशौण्डमलकं छिन्धि प्रियाया स्वयम् ॥

एष प्रहस्य गतः । इतो वयम् ' (परिक्रम्य) अये को नु खल्वेष इत एवाभिवर्तते ॥

दुश्चीवरावयवसंवृतगुह्यदेशो
बस्ताननः कपिलरोमशपीवरांसः ।
आयाति मूलकमदन् कपिपिङ्गलाक्षो
दाशेरको यदि न नूनमयं पिशाचः ॥ ६० ॥

भवतु, विज्ञातम् । "एष खलु भ्रातुरथवा वयस्यस्य तत्रभवतो दाशेरकाधिपतेरपत्यरत्नस्य गुप्तकुलस्यावासे दृष्टपूर्वः, तत् किमस्येह प्रयोजनम् ?एषमां कृताञ्जलिरुपसर्पति । किं ब्रवीषि ?'गुप्तकुलेण पेक्खासि ओवारिदपणपञ्चदिच्चु गणिका कावि किदप्पयतित्ति इनप्पुं आणा दिहूणागुपोरवीथीएअवेष आउणि काचि गणिकए दीषइतहम्मि तप्प अर्द, एतेणव्यं समंल्लेंतोणिव्युदिष्ष ए अम्बाए सेषापितं तुर्यंमर्थकेण दाणिगणिकाकामुप्पूळिद अष्षेण कुळंधित्थेव कामाण अष्षे जइ गच्छामि विषकहे दण्डितुं होमिरिदिवशाविषु एक एवंति" अहो देशवेषभाषादाक्षिण्यसम्पदुपेतो गुप्तकुलस्य युवराजस्य मदनदूतो वेश एव व-

र्तमानो वेशमापणाभिधानेन पृच्छति । तन्न शक्यमीदृशं रत्नमवबो-ध्य विनाशयितुम् । इदृशी एवास्तु । एवं तावदेनं वक्ष्ये । अत्र राज-वीथ्यां लावणिकापणेषु मृग्यतां गणिका । एष प्रहर्षात् प्रणिपत्य गतः । इतो वयम् । (परिक्रम्य) कनु खल्विदानीं दाशेरकदर्शनाव-धूतं चक्षुः प्रक्षाळयेयं (विलोक्य) भवतु, दृष्टम् । एतद्धि तदस्माकं पूर्वप्रणयिन्याः शूरसेनसुन्दर्या निवेशनम् । कथमपावृतपक्षद्वारमेव । यावदेतत् प्रविशामि । (प्रविष्टकेन) कनु खल्विमं पादप्रचारश्रमम् नयेयं । भवतु, दृष्टं । इयं खलु प्रियंगुवीथिका प्रियेवोत्सङ्गेन शिला-तलेन मामुपनिमन्त्रयते । यावदत्रोपविशामि । (विलोक्य) किमि-हाभिलिखितम् ॥ (वाचयति)

साग्वि प्रथमसङ्गमे न कलहास्पदं विद्यते
नचास्य विमनस्कता मशृणवं नवा कल्यताम् ।
युवान मभिसृत्य तं चिरमनोरथप्रार्थितं
किमस्यमृदितांगरागरचना तथैवागता ॥ इति ।

(विचिन्त्य) कस्याश्चित् खल्वियं केनापि प्रत्याख्यातप्रणयाया दौर्भा-ग्यघोषणा घुष्यते । तत् कंनु खलु पृच्छेयं ? (कर्णदत्वा) अये इयं चरणाभरणशब्दसूचिता शूरसेनसुन्दरीत एवाभिवर्तते । यैषा—

आलंब्यैकेन कान्तं किसलयमृदुना पाणिना छत्रदण्डं
संगृह्यैकेन नीवीं चलमणिरशनां भ्रश्यमनांशुकान्ता ।
आयात्यभ्युत्स्मयन्ती ज्वलिततरवपुर्भूषणानां प्रभाभिः
सज्योतिष्का सचन्द्रा सविहगविरुता शर्वरीदेवतेव ॥ ६२ ॥

भो यत्सत्यमभ्युत्थापयतीव मामत्यन्तस्यास्तेजश्रिता । एषा मां कपोत-केनोपसर्पति । अलमस्मानुपचारेण प्रत्यादेष्टुम् । किमाह भवती ? "चिरादपि तावत् स्वामिनामुपगतानामुपचारेण तावदयं जन आत्मा-

नमनुगृह्णीयात्" इति । अलमलमत्युपालम्भेन । इदमुचितमुत्सङ्गासनमनुगृह्यताम् । एषा मे शिरसा प्रतिगृहीतं इत्युक्त्वा शिलातलार्धे श्रोणीबिम्बेनाक्षिपन्तीवोपविशति । अये न खल्वत्रोपवेष्टव्यम् । किमाह भवती? 'किमर्थं' इति । नन्विदं कस्या अपि चरितं केनापि प्रत्याख्यातप्रणयाया: श्लोकसंज्ञकमयशोऽस्याभिर्दष्टम् । (कथं हस्ताभ्यां प्रमाष्टि) चोरि न शक्यमिदं प्रमाष्टुम् । इदं हि मे हृदि लिखितम् । एषा किं वारयति? किमाह भवती । 'जानीत एवास्मत्स्वामी— यथास्मत्सख्या कुसुमावतिकाया: प्रियवयस्यं चित्राचार्यं शिवस्वामिनं प्रति महान् मदनोन्माद:' इति । सुष्ठु जानीम:, किन्तु तत्रभवन्त्या कुसुमावतिकया तत्रभवाननभिगमनेनानुगृहीत: । किमाह भवती? 'मदनविक्लवस्य स्त्रीहृदयस्यायं स्वभाव:, कृतमनया स्त्रीचापल्यं' इति । चित्र: खलु प्रस्ताव:, पृच्छामस्तावदेनाम् । भवति विस्रंभ: पृच्छति, न पररहस्यकुतूहलिता । तत् कथमनयोश्चिराभिलषितसमागमोत्सवो निर्वृत्तोऽभूत्? किमाहभवती? "श्रूयतां" इति । अवहितोऽस्मि किमाह भवती? "तस्यां किल वारुणीमदलक्षेण तत्रभवन्तमनुगृहीतायां तत्रभवतो वयस्यस्य

> गत: पूर्वो याम: श्रुतिविरसया मल्लकथया
> द्वितीयो विक्षिप्त: पललगुडबाह्यव्यतिकरै: ।
> तृतीयो गात्राणामुपचयकथाभिर्विगलित:
> ततस्तान्निर्वृत्तं कथयितुमलंत्वप्ययपियत् ॥ ६३ ॥ इति ।

सुन्दरि कुतस्त्वयैतदुपलब्धं? किमाहभवती? "तस्यैव सख्युरुदवसितादागतात् प्रतीहारपद्मपालादुपलब्धवृत्तान्तया मयैषश्लोक: सुखप्राश्निकहस्तेनानुप्रेषित: । तत: सा तेनैव परिचारकेण मामुपस्थिता लज्जाविलक्षमुपहसन्तीव मामुक्तवती— नच रहस्यानाख्यानेन भवतीमाक्षेप्तुमर्हामि, श्रूयतामिदमपूर्वं — इति । ततोऽनयायथावृत्तं सर्वं मह्यमाख्या-

तम् । तेन हि त्वमप्यनेन श्रोत्रामृतेन संविभक्तुमर्हसि " इति । एषा सतलघातं प्रहस्य कथयति । सुन्दरि किं ब्रवीषि ? "श्रूयतामिदामिदानीं यन्मम प्रियसख्या कथितम् । सा हि मामुक्तवती — प्रियसखि स हि मया—

आलिङ्गितोऽपि स मया परिचुंबितोऽपि
श्रोण्यर्पितोऽपि करजैरुपचोदितोऽपि ।
खिन्नास्मि दार्विव यदा न स मामुपैति
शय्याङ्गमेकमुपगृह्य ततोऽस्मि सुप्ता ॥ ६४ ॥ इति ।

ततो मयोक्ता— कृच्छ्रं बतानुभूतवत्यसि । किमेतन्नावगच्छामि इति । ततो निश्वस्य मामुक्तवती—

यदा सर्वोपायैश्चटुभिरुपयातोऽपि स मया
न यत्नं कुर्वाणो मयि मनसिजेच्छामलभत ।
ततस्तस्मिन्सर्वप्रतिहतविधानास्मि सहसा
स्वदौर्भाग्यं मत्वा स्तनतटविकम्पं प्ररुदिता ॥ ६५ ॥

ततस्समां रुदतीमुत्सङ्गमारोप्य मुहुर्मुहुर्व्यर्थैश्चुंबनपरिष्वंगैराश्वासयन्नाम दृढमात्मानमायासितवान् । उक्तं च मया — किं ते पाणिभ्यां स्पृष्टया — इति । ततो व्रीडाच्छिन्नसाध्वसस्वेदवेपथुः शुष्यता मुखेन नातिप्रगल्भाक्षरमुक्तवान् —

न निन्दितुमनिन्दिते सुभगतां निजामर्हसि
च्युतं हि मम चक्षुरेतदभितो निधिं पश्यतः ।
प्रधाय किल मेदसो यदपिबं पुरा गुग्गुलुं
तदेतदुपहन्ति मे व्यतिकरामृतं त्वद्गतम् ॥ इति ॥ ६६ ॥

ततो मया चिन्तितम् —

मेदःक्षयायपीतोयदिगुग्गुलुरिन्द्रियक्षयं कुरुते ।
धूपार्थोऽपिनकार्यो गुग्गुलुना कमयमानेन (?) ॥ इति ।

एवमावयोश्चिरप्रार्थितमपार्थकं समागमनं प्राप्तकालमिच्छतोः,

रजनीव्यपयानसूचकोनृपतेर्दुन्दुभिपारिपार्श्वकः ।
अपठत्स्तुतिमङ्गळान्यलंसाहिघंटामभिहत्यघाटिकः ॥ ६८ ॥

ततस्तेनैव दक्षिणेनेव सुहृदा तस्मात् सङ्कटात्परिमोचिता कामिना सव्रीडं मुहूर्तमनुगम्य प्रेषिता । स्वगृहमागता च त्वया च सुखप्राश्निकाभिधानेनोपहसितास्मि । तदेतत्ते सर्वमशेषतः कथितम् । अहमिदानीं मिथ्या प्रजागरं दिवास्वप्नेनापनेष्यामीत्युक्त्वा मयानुज्ञाता । तदनन्तरागतेन स्वामिनाप्येतच्छ्रुतम् " इति । तेनह्यनेनैव परिहासप्लवेन तत्रभवतः शिवदत्तस्य पुत्रं शिवस्वामिनं पुरुषडंभगंभीरकीर्तिसागरमवगाहिष्ये । पश्यतु भवती —

यो गुग्गुलुं पिबति मेदसि संप्रवृद्धे
तस्य क्षयं व्रजति चण्ड्याचिरेण मेदः ।
स्त्रीणां भवत्यथ स यौवनशालिनीनां
आलेख्ययक्ष इव दर्शनमात्ररम्यः । ॥ ६९ ॥

एषा प्रहस्योत्थिता — यास्यामि — इति । भवत्वलमञ्जलिना । इतो वयम् । (परिक्रम्य)

किं नु खल्विमान्युद्दण्डपुण्डरीकवनषण्डशोभानुकारीण्युद्ग्रीववदनपुण्डरीकाणि विस्मयविततासमालाशबलानि उरसिनिहितकरपल्लवान्यन्योन्यसंज्ञापरिवृत्तकानि निवृत्तकन्दुकपिञ्छोळाकृतकपुत्रकदुहितृकाक्रीडनकानि वेशरथ्याया प्रतिभवनच्छासु वेशकन्यकावृन्दकान्यवलोकयन्ति ? अये किं नु खल्विदम् ॥

अरञ्जरमिदं लुठत्यथ दृतिः समाकृष्यते
क्बन्धमिदमुत्थितं व्रजति किं कुसूलद्वयं ।
भवेत् किमिदमद्भुतं भवतु सांप्रतं लक्षितं
तदेतदुपगुप्तसंज्ञमुदरं समुत्सर्पति । (१)

भोः सुष्ठु खल्विदमुच्यते धूर्तपरिषत्सु—

करभोगैर्गुप्तगलोहारिकृष्णः कृष्णएषवनमेघः ।
गोमहिषोहारिभूतिर्दृतिगुप्तोऽनिलाध्मातः । (१) इति ।

कथं नु तावदिमं सा तपस्विनी गङ्गायमुनयोश्चामरग्राहिणी पुस्तकवाचिका मदयन्तीं प्रियवयस्यं नक्षत्रपवन्तं त्रैविद्यवृद्धं पुस्तकवाचकमुत्सृज्योपगुप्तमनुरक्ता ? तथा चास्य कोमलाभ्यां भुजाभ्यां परिष्वज्यते । अथवा न तस्याः परिष्वङ्गेन प्रयोजनम् । सा हि तपस्विनी निवृत्तकामतन्त्रा रजोपरोधात् केवलं कुटुंबतन्त्रार्थं शब्दकाममनुवर्तते । गम्यश्चायमस्याः । 'अपुमान् शब्दकामः' इति दात्तकीयाः । (विलोक्य) किञ्च तावदयमाविग्न इव । आ ज्ञातम् । तस्या एव मात्रा पणार्थमधिकरणायाकृष्यत इति वेशे मयोपलब्धम् । ततः श्वश्वा सह कृतविवादेनानेन भवितव्यम् । महदिदं परिहासवस्तु । न शक्यमस्यातिक्रमणादात्मानं वञ्चयितुम् । यावदेनमुपसर्पामि । (उपेत्य) हण्डे वेशवीथीयक्ष कुतो भवान् । एष पादचारखेदात् काकोच्छ्वासश्रमविषमिताक्षरं -- अयमञ्जलिः — इत्युक्त्वा स्थितः । स्वस्ति भवते । किं ब्रवीषि ? "एष खलु तया वृद्धपुंश्चल्या सह विवादार्थं गत्वा कुमारामात्याधिकरणादागच्छामि" इति । कथं भवन्तं जयेन वर्धयामः, उताहोस्विन् दण्डसाहाय्येन संभावयामः ? किमाह भवान् ? "कुतो जयदण्डाभ्यां सह संयोगः, केवलं क्लेशोऽनुभूयते" इति । कस्मात् ? किं ब्रवीषि ?

अध्यातिर्विष्णुदासो भ्रात्रा किल तर्जितोऽस्मि कोङ्केन ।
द्राक्केनाभिहतोऽहं क्रोशति विष्णुः स्वपिति चात्र ॥ अपिच,
मृगयन्ते तदधिकृता मृगयन्ते पुस्तपालकायस्थाः ।
कार्मुकमहत्तरैरपि विधृतोऽस्मि चिरं मृगयमाणैः ॥ ७० ॥

अपिच ततो मयावधृतम् ।

गणिकायाः कायस्थान कायस्थेभ्यश्च विमृशतो गणिकाः ।
गणिकायै दातव्यं रतिरपि तावत् भवत्यस्यां ॥ ७१ ॥ इति ।

दिष्ट्या कायस्थवागुरादतीतं भवन्तमक्षतं पश्यामि । सर्वथा प्रतिबुद्धोऽसि । इदानीमियमाशीः—

कलमधुररक्तकण्ठी शयने मदिरालसा समदना च ।
वक्त्रापरवक्त्राभ्यामुपतिष्ठतु वारमुख्या त्वां ॥ ७२ ॥

एष सततघातं प्रहृस्य प्रस्थितः । इतो वयं । (परिक्रम्य) अये अयमपरः—

स्रस्तैर्वङ्गाढकान् लाटभक्त्या
दत्त्वा चित्रान् कोऽपमायाति मत्तः ।
विभ्रान्ताक्षो गण्डविच्छिन्नहासो
वेशस्वर्गं किं कृतेऽयं प्रविष्टः ॥ ७३ ॥ भवतु, विज्ञातम् ।

शर्करपालस्य गृहे जातः कीरेण चर्मकारेण ।
एष खलु कोङ्कचेट्यां पिशाचिकायां तृणपिशाचः ॥ ७४ ॥

अपि च,

शर्करपालं पितरं व्यपदिशति भ्रातरञ्च निरपेक्षम् ।
प्रायेण दौष्कुलेयाः सहैव दंभेन जायन्ते ॥ ॥ ७५ ॥

(परिक्रम्य) भोः किं नु खलु प्रच्छेयम् ?— किमस्य वेशप्रवेशे प्रयो-

जनं— इति । अये अयं जरद्विटो भट्टिरविदत्त इत एवाभिवर्तते । यावदेनं पृच्छामि । अथो भट्टिरविदत्त कच्चिज्जानीते भवानस्य पुरुषवेतालस्य वेशप्रवेशप्रयोजनम् ? किं ब्रवीषि ? "भवानेव जानीते" इति । तद्गच्छतु भवान् (परिक्रम्य) कनु खल्विदं पुरुषकान्तारावगाहश्रान्तं मनो विनोदयेयम् । भवतु दृष्टम् ॥

इदमपरं प्रियसुहृदः सुहृद्भयादर्पितार्गळं भवनम् ।
वेश्यासुरतविमर्देष्वकृतविरामस्य रामस्य ॥ ७६ ॥

तत्कथं प्रविशामि (कर्णं दत्वा)

यथाकाञ्चीशब्दश्चरतिविकलो नूपुररवैः
यथा मुष्ट्याघातः पतति वलयोद्घातपिशुनः ।
यथा निश्शूत्कारं श्वसितमपि चान्तर्गृहगतं
ध्रुवं रामा रामं युवतिविपरीतं रमयति ॥ ७७ ॥

तदलमिह प्रविष्टकेन । कः सुरतरथाक्षभङ्गं करिष्यति ? इतो वयम् । (परिक्रम्य) अये अपरः—

दग्धः शाल्मलिवृक्षः कतिपयविटपाग्रशेषतनुशाखः ।
कृष्णः कृशो विटबको वेशनलिन्या मरुपिशाचः ॥ ७८ ॥

भवतु, विज्ञातम् । एष हि सौपरस्तौण्डिकोकिः सूर्यनागः । ततः किमिहास्य प्रयोजनम् ? कथमेष मां दृष्ट्वैवोत्तरीयावकुण्ठनेन मुखमपवार्य कामदेवायतनमपसव्यं कृत्वा प्रस्थितः । भो यदातावदद्य तृतीयेऽहनि बहिश्शिबिके कुटङ्कागारनिकेतनाभिः पताकावेश्याभिः संप्रयुक्तो म्लेच्छश्वबन्धकैर्व्यवहारार्थं श्रावणिकैराधिकरणमुपनीयमानः स्कन्धकीर्तिना बलदर्शकेन स्वामिनो मे विष्णोः स्थालीपतिरिति कृत्वा कृच्छ्रात्प्रमोचित इति वयस्यविष्णुनागेन कथितम् । तत्किमयमिदानीमस्माद्देशसंसर्गात् व्रीळित इवात्मानं परिहरति । (विचिन्त्य) पा-

र्थिवकुमारसन्निकर्ष एनमनया प्रवृत्त्या श्लाघयति । आश्चर्यम् ! गुणवान् खलु गुणवतां सन्निकर्षः । यदयमपि नामैवं गुणाभिमुखः । तन्न शक्यमेनमप्रत्यभिज्ञानेन सकामं कर्तुम् । यावदहमप्ययनं प्रदक्षिणीकुर्वन्नामसंमुखीनमेनं परिहासावस्कन्देन हन्मि । (परिक्रम्य) एष मां प्रतिमुखमेवावलोक्य प्रतिहसितः । हन्त सूर्यनाग किमयं वेशनवावतारोऽन्धकारनृत्तमिव सुहृदवक्षेपेण विफलीक्रियते? किं ब्रवीषि? "क इव ममेहार्थः? अहं हि कारायामवरुद्धस्य मातुलस्य मौद्गल्यस्य पारशवस्य हरिदत्तस्य पूर्वप्रणयिनीमकल्यरूपामद्य वार्तां पृच्छंस्तेनैव प्रहितोऽस्मि। त्वं तु मां कथमप्यवगच्छसि" इति । आश्चर्यमिदं हि — भवतः सुहृद्व्यापारेषु स्थैर्यं, तस्याश्च वारमुख्यायाः पूर्वप्रणयिष्वापद्गतेष्वपि प्रतिपत्तिश्च । अतश्चैनां —

वर्णानुरूपोज्वलचारुवेषां लक्ष्मीमिवालेख्यपटे निविष्टाम् ।
सापह्नवां कामिषु कामवन्तोऽरूपां विरूपामपि कामयन्ते ॥

किञ्च, अतिदुष्करकारिणीञ्चैनामवगच्छामि । कुतः ? असंशयं हि सा —

कारानिरोधादतिकारगौरं देवार्चनाजातकिणं ललाटे ।
आस्यं बृहच्छ्मश्रुवितानन्द्धं कालास्थिनिर्भुग्नमिवावलेढि ॥

किमाह भवान् ? "अत एवास्माकमस्यामादरः" इति । भवत्वेवम् ! सुहृदनुरक्तं भवन्तं ख्यापयामो वयम् । एष खलु— प्रसीदतु स्वामी — इति पादमूलयोरुपगृह्णाति । किं ब्रवीषि ? "नार्हति स्वामी ममैव वेशप्रवेशं कचिदपि प्रकाशीकर्तुं" इति । भो वयस्य कश्चान्द्रोदयं प्रकाशयति? ननु यदैव भवांस्तत्र भवत्या रूपदास्याः परिचारिकां कुब्जां प्रति बद्धमदनानुरागस्तदैवैतास्मिन् प्रदेशे उदकतैलबिन्दुवृत्त्या विकसितं यशः । सातावत् भोः —

परिष्वक्ता वक्षः क्षिपति गडुना याति बृहता
 स्फिके भुग्नानेष्टे जघनमुपधातुं समदना ।
सरूपा टिट्टिभ्यां भवति शयिता या च शयने
 कथं त्वं तां कुब्जामवनतमुखाब्जां रमयसि ? ॥ ८१ ॥

किं ब्रवीषि ? "शान्तं पापं शान्तं पापं, प्रतिहतमनिष्टम् । स्वागतमन्वाख्यानाय । पश्य तु भवान् —

सविभ्रान्तैर्यातैः करभललितं या प्रकुरुते
 मुहुर्विक्षिप्ताभ्यां जलमिव भुजाभ्यां तरति या ।
मुखस्योत्तानत्वाद्गगन इव तारा गणयति
 स्पृशेत् कस्तां प्राज्ञः कृमिजनितरोगामिव लताम्?" ॥ इति ।

अहो धिक्कष्टमेवं धर्मज्ञस्य भवतो न युक्तमुपयुक्तस्त्रीनिन्दां कर्तुम् । अपि च, —

यद्यपि वयस्य कुब्जा नालीनलिकाकृशा च गडुला च ।
 असतामिव संप्रीतिर्मुख्यम (?) रणीया भवति यावत् ॥ ८३ ॥

न चेयं ताभ्योऽरण्यवासिनीभ्यः पताकावेश्याभ्यः पापीयसी । किं ब्रवीषि ? "काभ्य" इति । कथं न जानीषे —

यास्त्वं मत्ताः काकिणीमात्रपण्याः
 नीचैर्भोग्याः सोपचारैर्नियम्याः ।
लोकैरुच्छं काममिच्छन् प्रकामं
 कामोद्रेकात् कामिनीऽधाम्यरण्ये ॥ ८४ ॥

किं ब्रवीषि ? "कुतस्त्वयैतदुपलब्धं" इति । सहस्रचक्षुषो वयमीदृशेषु प्रयोजनेषु । अपि च, पदात्पदमारोक्ष्यति भवान् —

त्यक्त्वा रूपाजीवां यस्त्वं कुब्जां वयस्य कामयसे ।
 कुब्जामपि हि त्यक्त्वा गन्तासि स्वामिनीमस्याः ॥ ८५ ॥

एष प्रहस्य प्रस्थितः । इतो वयं साधयामः । (परिक्रम्य)

अये अयमपरः कः सिंहलिकाया मयूरसेनाया गृहान्निष्पत्य स्कन्धविन्यस्तवसनो विमलासिपाणिभिर्दाक्षिणात्यैः परिवृतो भद्राङ्कं विरक्तमुत्तरीयमाकर्षन्नान्ध्रकं कार्पासमं निवसितः कुंकुमानुरक्तच्छविस्तांबूलसमादानव्यग्रपाणिरित एवाभिवर्तते । भवतु, दृष्टम् । एष हि विदर्भवासी तलवरो हरिशूद्रः । भो यदा तावदयं तां कावेरिकामनुरक्त इति ममैव तु समक्षं सपादपरिग्रहमनुनयन्नप्युक्तस्तया —

तामेहि किं तव मया ज्योत्स्ना यदि क इव दीपशिखयार्थः ।
विरम सहसंगृहीतुं बिल्वद्वयमेकहस्तेन ॥ इति ॥ ८६ ॥

तत् कथमनेनेयमनुनीता भविष्यति? किमयमनुरक्तामपि त्यक्त्वाऽन्यां प्रकाशं कामयत इति वेशप्रत्यक्षमात्मनो दौर्भाग्यमयशस्यमिति स्वयमेव प्रसन्ना । आहोस्वित् काम्यमानं कामयन्ते स्त्रिय इति स्त्रीस्वभावादस्याः संघर्ष उत्पन्नः उताहो परिव्ययार्थकर्शितया मात्रैवानुनियुक्ता भविष्यति । सर्वथा प्रक्ष्याम्स्तावदेनम् । (उपसृतकेनाञ्जलिं कृत्वा)

तां सुन्दरीं दरीमिव सिंहस्य मनुष्यसिंह सिंहलिकाम् ।
युक्तं भवता मोक्तुं द्रमिळीसुरताभिलाषेण ॥ ८७ ॥

किं ब्रवीषि? "अनुनीता मया मयूरसेना । एष तस्या एव गृहादागच्छामि" इति ॥

कथय कथय कथमवशीर्णप्रायः सन्धिरनुष्ठितः ॥

किं ब्रवीषि? "अद्य तृतीयेऽहन्यहमपि वेश्याध्यक्षप्रतिहारद्रोणिलकगृहे प्रेक्षायामुपनिमन्त्रितस्तत्र च मयूरसेनाया लास्यवारो बुद्धिपूर्वक इत्यवगच्छामि । ततः प्रतारितेष्वातोद्येषु देवतामङ्गळं पूर्वमुपोह्य प्रस्तुते गीतके प्रनृत्तायां नर्तक्यां प्रथमवस्तुन्येव मयूरसेनायाः खलु

नृत्ते प्रयोगदोषा गृहीता" इति । मालाविकाः मयूरसेनायाः खलु नृत्ते प्रयोगदोषा गृह्यन्त इति । कस्यायमतटप्रपातः ॥

किं ब्रवीषि? "भगवत्या वारुण्या" इति ।

युक्तं नित्यसन्निहिता भगवती सुरादेवी प्रतिहारगृहे ।

अथ कमन्तरीकृत्यायं सुराविभ्रमः ।

किं ब्रवीषि "वयस्यमेव ते लासकमुपचन्द्रक"मिति ।

किमु (ननु) पपन्नमायतनं हि स ईदृशानाम् ।अपितु सविषयस्तस्यैषः । ततस्ततः ।

किं ब्रवीषि "स चोपचन्द्रपक्षे ससर्वसामाजिकजनः मयापि मयूरसेनायाः पक्षः परिगृहीतः" इति ।

साधु वयस्य देशकालौपयिकमनुष्ठितम् । ततस्ततः । किं ब्रवीषि "ततो न तेषां बुद्धिं परिभवामि । अपरिभूतामेव सदस्या आगमप्रधानतया मे प्राश्निकानुमते प्रतिष्ठितः पक्ष" इति ॥

साधु वयस्यानन्यसाधारणेन पण्येन क्रीता तत्रभवती । ततस्ततः ॥

किं ब्रवीषि "ततः सर्वगणिकाजनप्रत्यक्षं दत्ते पारितोषिके मयूरसेनायाः स्मितपुरस्सरेणापाङ्गपातिना कटाक्षेण प्रसादित इवास्मि । कावेरिकायास्तु पुनरसूयापिशुनमुत्थाय गच्छन्त्या, आकारेण बहूपालब्ध इवास्मि । तयोश्च कोपप्रसादयोश्च प्रत्यक्षतयोभयतटभ्रष्ट इव सन्देहस्रोतसा ह्रियमाणस्तस्मात्सङ्कटात्कथञ्चिद्गृहानागतः । उपविष्टश्च कानयोः किं प्रतिपत्स्यत इति वितर्कडोलां वाहयामि । ततः सहसैव मे प्रियया समेत्य नेत्रे निमीलिते । ततो विहस्य मयोक्ता

'नेत्रनिमीलननिपुणे किं ते हसितेन चोरि गूढेन ।
सूचयति त्वां पाण्योरनन्यसाधारणः स्पर्शः ॥ ८८ ॥ इति

एवमुक्तयानया सुरभितनिश्वाससूचितमदस्खलिताक्षरमभिहितोऽहमा-चक्ष्वमा काह'मिति । ततो मयोक्ता

'रोमाञ्चकर्कशाभ्यां प्रत्युक्तासि ननु मे कपोलाभ्याम् ।
यद्वदसि पुनर्मुग्धे स्वयमेवाचक्ष्व काह'मिति ॥ ८९ ॥

तत उन्मील्य मामुक्तवती 'अनेनैव रोमाञ्चसंज्ञकेन कैतवेन अयं जन आकृष्यत' इत्युक्त्वा मां कपोले चुम्बित्वा प्रस्थिता । ततो मयोक्ता

'चुम्बितेनेदमादाय हृदयं क्व गमिष्यसि ।
चोरि पादाविमौ मूर्ध्ना धृतौ मे स्थीयतां ननु' ॥ ९० ॥

एवंचोक्ता शयनमुपगम्योपविष्टा। ततो मयास्याः स्वयं पादौ प्रक्षालितौ । अनया चास्म्युक्तः 'गृहीतं पाशम् । गृहीदानीं कितवः खल्वसी'ति । ततो विकोचमुकुलजालकेनेव मालतीलताविहसितेनैकहस्तावलम्बितसरशननिवसना पर्यङ्कावेष्टनत्रिगुणमध्यबाहुमृणालिकात्रिकपरिवर्तनसाचीकृतदर्शनीयतरा तदानीं वेष्टमानमध्यविषमवालिप्रनष्टनाभिमण्डलप्रविष्टमीकृत रोमराजिरेकस्तनावगाळितहारापाश्रितेतरस्तनकलशपार्श्वावगाळितकपोलपर्यस्तकुण्डलमकराविष्ठितविशेषककान्ततरेणां सपरावृत्त शोभिनावस्थानेन लज्जाद्वितीया रतिरिव रूपिणी समुत्थितैकभ्रूलतिकेन कुवलयशबळं जलमिवाकिरन्ती दृष्टिविक्षेपेण मामुक्तवती 'यत्तेरोचत' इति। ततोऽहमासङ्गमालेख्यवर्णकपात्रं गवाक्षाद्दाक्षिण्य चरणनळिनरागायोपस्थितः । अथ वयस्यालक्तकविन्यासविन्यस्तचक्षुरुत्क्षिप्तपार्ष्णिगुल्फनूपुराधिष्ठितजङ्घाकाण्डायाः तस्या असंभुक्तत्वादनूरुग्राहिणो मर्मरस्योपसंहारभङ्गाभोगानुकारिणः कौशेयस्यासंयतत्वाद्गजकलभदन्तदशनच्छदान्तरमिव कदळीगर्भमिव चान्तरूरुमीक्षे। ईक्षणच्चापोह्याविनीतचक्षुरसीत्युक्त्वा पादमाक्षिप्योरसि मां ताडितवती । ततो रोमाञ्चकवचकर्कशत्वचा मयोक्ता 'नार्हसि मामसमाप्तरागमवक्षेप्तु'मिति। ततस्तयाहमुक्तः 'साधु खलु निमीळिताक्षः समापयैन'मिति। तत-

स्तस्या लाक्षारसं निमीलिताक्षोऽर्पयामि चरणाभ्यां सकचग्रहमधरोष्ठे गृहीतोऽस्मि। ततस्तथैव विवृतरोमाञ्चं मां समभिवीक्ष्याशोकसमदोहलोऽसि नमोऽस्तु ते शाठ्यायेति मां परिष्वज्यशय नमुपगता। ततः परं देवानां प्रिय एव ज्ञास्यति" इति ॥

यद्येवमर्हति भवानपि तौण्डिकोकिविष्णुनागप्रायश्चित्तार्थं सन्निपतितान्विटानुपस्थातुम् ॥

किं ब्रवीषि "शान्तमेतत् पुनरपि यदि शिरो मे तस्याश्चरणकमलताडनेनानुगृह्येत तदेव मे प्रायश्चित्तम्" इति ॥

यद्येवं यमुनाह्रदनिलयो यदुपतिचरणाङ्कितललाटो नागः कालिय इव वैनतेयस्यावध्य इदानीं सर्वविटानामपि । एष विहस्यायमञ्जलिरिति प्रस्थितः । यावदहमपि विटसमाजं गच्छामि । अहो तु खलु सुहृत्कथाठ्यमैरस्माभिरतीतमप्यहो न विज्ञातम् । संप्रति हि—

सोत्कण्ठैरिव गच्छतीति कमलैर्मीलद्भिरालोकितः
प्रच्छायैरधिरुह्यवेश्मशिखराण्युत्सार्यमाणातपः ।
तैः स्पृष्ट्वा चिरमुन्मुखीषु किरणैरुद्यानशाखास्वसौ
यात्यस्तं वलभीकपोतनयनैराक्षिप्तरागो रविः ॥ ९१ ॥

अपि चेदानीम्

प्राकाराग्रे गवाक्षैः पतनिखररुतैः सूच्यमानोपि लाळः
प्रासादेभ्यो निवृत्तो व्रजति समुचितां वासयष्टिं मयूरः ।
सांध्यं पुष्पोपहारं परिहरतिमृगः स्थण्डिले स्वप्तुकामः
तोयादुत्तीर्य चासौ भवनकमलिनी वेदिकां यातिहंसः ॥ ९२ ॥

(परिक्रम्य)

एते प्रयान्ति घनतां वलभीषुधूपाः
वैडूर्यरेणव इवोत्पतिता गवाक्षैः ।
रथ्यासु चैतमवगाढमुदग्रमेत्य
स्नानोदकौघमनुपश्चरणा भ्रमन्ति ॥ ९३ ॥

अहो नु खल्विदानीमस्य संमृष्टसिक्तावकीर्णकुसुमप्रद्वाराजिरस्य प्रादोषिकोपचारव्यग्रपरिचारकजनस्य देशवयोविभवानुरूपालंकारव्यापृतवारमुख्यजनस्य प्रचरितमदनदूतीसञ्चाररमणीयस्य प्रवृत्तमत्तविटविदग्धपरिहासरसान्तरस्य स्नातानुलिप्तपीतप्रतीततरुणजनावकीर्णचतुष्पथशृङ्गाटकस्य वेशमहापथस्य परा श्रीः । इह हि—

एषा रात्र्युपवेशिता गजवधूरारुह्यमाणा शनैः
एतत्कम्बलवाह्यकं प्रमदया द्वाःस्थं समारुह्यते ।
शिञ्जन्नूपुरमेखलामुपवहन्वेश्यां चलत्कुण्डलां
श्रोणीभारमपारयन्निव हयो गच्छत्यसौ धौरितम् ॥९४॥

अपि चास्मिन्निमाः—

प्रदीपकरवल्लरीजटिलचारुवातायना
मयूरगलमेचकैरनुसृतास्तमोभिः क्वचित् ।
विभान्ति गृहभित्तयो नवसुधावदातान्तराः
तमालहरितालपङ्ककृतपत्रलेख्या इव ॥ ॥९५॥

(परिक्रम्य)

सर्वथा रमणीयस्तावदयमुज्झियमानचन्द्रसनाथ उत्सवः प्रदोषसंज्ञको जीवलोकस्य । संप्रति हि— एष भगवांश्चक्षुषां साधारणं रसायनं हसितमिव कुमुदवापीनामुदेति शीतरश्मिः । य एषः—

किं नीलोत्पलपत्रचक्रविवरैरभ्येषि मा चुम्बितुं
न त्वां पश्यति रोहिणी कथय मे सन्त्यज्यतां वेपथुः ।
मत्तानां मधुभाजनेष्विति कथाः श्रोतुं सहासा इव
स्त्रीणां कुण्डलकोटिभिन्नकिरणश्चन्द्रः समुत्तिष्ठति ॥९६॥

(परिक्रम्य)

गाढल्येषा वल्गुकान्तद्वितीया
सुप्रकाणा स्पृश्यतेऽसौ विपञ्ची ।
बध्वा गोष्ठीं पीयते पानमेत-
द्धर्म्याग्रेषु प्राप्तचन्द्रोदयेषु ॥ ॥ ९७ ॥

अपि चेदानीमेष भगवान्—

विरचयति मयूखैर्दीर्घिकाम्भस्सु सेतुं
विसृजति कदलीषु स्वाः प्रभादण्डराजीः ।
पुनरपि च सुधाभिर्वर्णयन् सौधमालाः
क्षरति किसलयेभ्यो मौक्तिकानीव चन्द्रः ॥ ९८ ॥

(परिक्रम्य) अहो नु खलु क्षीरोदेनेवोद्वेलप्रवृत्तविकीर्यमाणवीचिराशिना ज्योत्स्नासंज्ञकेन पयसा प्रसर्पतानुगृहीत इव जीवलोकः। सम्प्रति हि—

एते व्रजन्ति तुरगैश्च करेणुभिश्च
कर्णीरथैरपि च कम्बलवाह्यकैश्च ।
आलिङ्गिता युवतिभिर्मुदिता युवानो
गन्धर्वसिद्धमिथुनानि विहायसीव ॥ ॥ ९९ ॥

(परिक्रम्य)

असावन्वारूढो मदललितचेष्टः प्रमदया
परिष्वक्तः पृष्ठे निबिडतरनिक्षिप्तकुचया ।
परावृत्तश्चुम्बन्व्रजति दयितां यस्य तुरगे
गृहानेषोऽभ्यासादनुपतति नोत्क्रामति पथः ॥ १०० ॥

कश्च तावदयमस्मिंश्चन्द्रातपेऽप्यन्धकार इव वर्तमानो वेशरथ्यायां गर्भ-गृहभोगेन स्निग्धनैल्यमाविष्करोति? आः ज्ञातम् । एष सौराष्ट्रिकः शककुमारो जयन्तक इमां घटदासीं बर्बरिकामनुरक्तः । किञ्च तावद-नेनैतस्मात् सर्ववेश्यापत्तनाद्देशवद्देशबर्बर्यां गुणवत्त्वमवलोकितम् । किञ्च तावत् —

> अधिदेवतेव तमसः कृष्णागुरुका द्विजेषु चाक्ष्णोश्च
> असकलशशाङ्कलेखेव शर्वरी बर्बरी भाति ॥ १०१ ॥

अथवा सौराष्ट्रिका वानराबर्बरा इत्येको राशिः किमत्राश्चर्यम् । तथा हि—

> धवलप्रतिमायामपि बर्बर्यां सक्तचक्षुषो ह्यस्य ।
> अलससकषायदृष्टेः ज्योत्स्नापीयं तमिस्रेव ॥ १०२ ॥

तदलमयमस्य पन्थाः । इतो वयम् । (परिक्रम्य) इयमपरा का —

> कर्णद्वयावनतकाञ्चनतालपत्रा
> वेण्यन्तलग्नमणिमौक्तिकहेमगुच्छा ।
> कूर्पासकोत्कचचितस्तनबाहुमूला
> लाटी नितम्बपरिवृत्तदशान्तनीवी ॥ ॥ १०३ ॥

(विचार्य) भवतु विज्ञातम् । एषा हि सा राका राज्ञः स्यालमाभीलकं मयूरकुमारं मयूरमिव नृत्यन्तमालिङ्गन्ती चन्द्रशालाग्रे वेशवीथ्यामा-त्मनः सौभाग्यं प्रकाशयति । अयमपि चार्जवेनानया तपस्वी क्रीत इव ।

> अपि च मयूरकुमारं गौरीकृष्णमतिदुर्बलं स्थूला ।
> स्वमिव प्रच्छायाग्रकमुरसि विलग्नं वहत्येषा ॥ १०४ ॥

(परिक्रम्य) इयमपरा का (विचार्य)

इयं हि सा तत्रभवतः सुगृहीतनाम्नः शार्दूलवर्मणः पुत्रस्य नः प्रियवय-

स्यस्य वराहदाहस्य प्रियतमा यवनी कर्पूरतुरिष्ठा नाम प्रतिचन्द्राभिमुखं मधुनः कांस्यमङ्गुलित्रयेण धारयन्ती कपोलतलस्खलिताविम्बमवलम्ब्य कुण्डलं किरणैः प्रेङ्खोलितमंसदेशे शशिनमिवोद्वहन्ती यैषा—

चकोरचिकुरेक्षणा मधुनि वीक्षमाणा मुखं
विकीर्य यवनी नखैरलकवल्लरीमायताम् ।
मधूककुसुमावदातसुकुमारयोर्गण्डयोः
प्रमार्ष्टि मदरागमुत्थितमलक्तकाशङ्कया ॥ १०५ ॥

अपि च यवनी गणिका, वानरी नर्तकी, मालवः कामुको गर्दभो, गायक इति गुणतः साधारणमवगच्छामि । सर्वथा सदृशयोगेषु निपुणः खलु प्रजापतिः । तथा हि—

खदिरतरुमात्मगुप्ता पटोलवल्ली समाश्रिता निम्बं
श्लिष्टो बत संयोगो यदि यवनी मालवे सक्ता ॥ १०६ ॥

तत्काममियमपि मे सखी नत्वेनामभिभाषिष्ये । को हि नाम तानि वानरी निष्कूजितोपमानि चीत्कारभूयिष्ठानि अप्रत्याभिज्ञेयव्यञ्जनानि किञ्चित्करेणान्तराणि (?) प्रदर्शिनीलालनमात्रसूचितानि स्वयंवेशयवनीकथितानि श्रोष्यति । तदलमनया (परिक्रम्य) अयमपरः कः—

प्रतिमुखपवनैर्वेगादुत्क्षिप्ताग्रालकोत्तरीयान्ताम् ।
कान्तां हरति करेण्वा वासवदत्तामिवोदयनः ॥ १०७ ॥

(विचार्य) आ विदितम् । एष स इभ्यपुत्रो विटप्रवाल इति डिण्डिभिरभ्यस्तनामा सुरतरणपटकस्यंचराणामधिपतिस्तां वेशसुन्दरीमसत्वालिकां मदनपरवशः पितुर्मातुश्च शासनमुपेक्ष्यानुरक्त एव । कामममतिडिण्डी खल्वयम् श्वशुरशब्दावकुण्ठनास्तु वयम् । तदलमनेनाभिभाषितेन । अयमस्यामालिरितस्तावद्वयम् । (परिक्रम्य) ॥

यावदहमपि विटसमाजं गच्छामि । एषोऽस्मि भोः सुवृथातिवाहिते (?) वेशमहापथे विटमहत्तरस्य भट्टिजीमूतस्य समन्तात्सन्निपातितविटजनवाहनसहस्रसंबाधप्रद्वाराङ्गमुत्क्षिप्तरजतकलशपाद्यपरिचारकोपास्थिततोरणं भवनमनुप्राप्तः । सुष्ठु खल्विदमुच्यते— "महान्तः खलु महतामारम्भा" इति । साम्प्रतं ह्येतद्दशार्धवर्णं (?) पुष्पमुत्कीर्यते मुक्तमासज्यते ग्रथितं सञ्चार्यन्ते धूपाः प्रज्वाल्यन्ते दीपाः उच्यते स्वागतं मुच्यते यानं दृश्यते विभ्रमः उपगीयते गीतं उपवाद्यते वाद्यं दीयते हस्तः कथ्यते श्लक्ष्णं आलिङ्ग्यते स्निग्धं अवलम्ब्यते सप्रणयं अवनम्यते सविनयं स्पृश्यते पृष्ठं आहन्यते सभ्रूक्षेपं आघ्रायते शिरः स्थीयते सविभ्रमं उपविश्यते सलीलं विश्राण्यते चन्दनं आलिप्यते वर्णकः विन्यस्यते विलेपनं उत्कीर्यते चूर्णः परिहास्यते विटैः प्रतिगृह्यते विलासिनीभिरिति । किं बहुना—

पुष्पेष्वेते जानुदघ्नेषु लग्नाः
कृच्छ्रात्पादा वामनैरुद्ध्रियन्ते ।
विभ्रान्ताक्ष्यः केतकीनां पलाशान्
सीत्कुर्वाणाः पादलग्नान् हरन्ति ॥ ॥ १०८ ॥

अपि चैते विटमुख्याः—

श्रीमन्तः सखिभिरलङ्कृतासनाढ्याः
कुर्वन्तश्चतुरममर्मवेधि नर्म ।
वेश्याभिः समुपगताः समं समन्ता-
दुक्षाणो व्रज इव भान्ति सोपसर्पाः ॥ १०९ ॥

अपि चैषामेतत्सदः—

नभ इव शतचन्द्रं योषितां वक्त्रचन्द्रैः
कृतशबलदिगन्तं सम्पतद्भिः कटाक्षैः ।
सपरिघमिव यूनां बाहुभिः सम्प्रहारैः
निचितमिव शिलाभिश्चन्दनार्द्रैरुरोभिः ॥ ११० ॥

अपि चास्मिन् —

एते विभान्ति गणिकाजनकल्पवृक्षाः
तादात्विकाश्च खलु मूलहराश्च वीराः
बाल्येऽपि काष्ठकलहान् कथयन्ति येषां
वृद्धाः सुयोधनवृकोदरयोरिवोच्चैः ॥ १११ ॥

तदेतावदहमपि सुहृन्निदेशवेष्टने शिरसि भगवते चित्तेश्वरायाञ्जलिं कृत्वा सुहृन्निदेशादिममधिकारं पुरस्कृत्य प्रायश्चित्तार्थं तत्रभवतस्तौण्डिकोकेर्विष्णुनागस्य घोषणापूर्वं विटान्विज्ञापयामि ॥ (परिक्रम्य) भोभोः सकलक्षितितलसमागताः प्रियकलहाः कलहानां च निर्वेदितारो धूर्तमिश्राः शृण्वन्तु शृण्वन्तु भवन्तः ॥

कामस्तपस्विषु जयत्यधिकारकामो
विश्वस्य चित्तविभुरिन्द्रियवाज्यधीशः ।
भूतानि बिभ्रति महान्त्यपि यस्य शिष्टिं
व्यावृत्तमौलिमणिरश्मिभिरुत्तमाङ्गैः ॥ ११२ ॥

(परिक्रम्य)

अथ जयति मदो विलासिनीनां
स्फुटहसितप्रविकीर्णकर्णपूरः ।
स्खलितगतमधीरदृष्टिपातं
तदनु च यौवनविभ्रमा जयन्ति ॥ ॥ ११३ ॥

तदेवं वारमुख्यजनचरणरजःपवित्रीकृतेन शिरसा धूर्तमिश्रान्प्रणिपत्य विज्ञापयामि । किं चैतद्विज्ञाप्यमिति ? श्रूयताम्—

नागवद्विष्णुनामोऽसावुरसा वेष्टते क्षितौ ।
प्रायश्चित्तार्थमुद्विग्नस्तमेनं त्रातुमर्हथ ॥ ११४ ॥

किं मां पृच्छन्ति भवन्तः "कोऽस्यापनयः" इति। श्रूयताम्—

उत्क्षिप्तालकमीक्षणान्तगलितं कोपाञ्चितान्तभ्रुवा
दष्टाधरोष्ठमधीरदन्तकिरणं प्रोत्कम्पयन्त्या मुखम्।
शिञ्जन्नूपुरया विकृष्य विगलद्रक्तांशुकं पाणिना
मूर्ध्न्यस्य सनूपुरः समदया पादोऽर्पितः कान्तया ॥

किं किं वदन्ति भवन्तः "कस्याः पुनरिदमविज्ञातपुरुषान्तरायाः प्रमादसंज्ञकमयशो विस्तीर्येत" इति ॥

ननु तत्रभवत्याः सौराष्ट्रिकाया मदनसेनिकायाः। एते विटा दिष्ट्या नेह कश्चिदिति संभ्रान्ता इव। य एते॥

निर्धूतहस्ता विनिगूढहासा धिग्वादिनो धीरमुखानि बध्वा
ध्यायन्ति संप्रेक्ष्य परस्परस्य जातानुकम्पा इव नाम धूर्ताः॥

एतेषां तावदासीनानां नियुक्तो विटमहत्तरो भट्टिजीमूतः कृपया नाम परं वैक्लव्यमुपगतः। य एषः—

कष्टंकष्टमिति श्वासान्मुञ्चन्क्लान्त इव द्विपः।
जीमूत इव जीमूतो नेत्राभ्यां वारि वर्षति ॥ ११७ ॥

एष मामाह्वयति। अयमागतोऽस्मि ॥

किमाज्ञापयति भट्टिः "श्रुतपूर्वं मया, भूयोऽपि वदसि—एवं प्रायश्चित्तार्थं ब्राह्मणोपगमनम्। तस्मादेवाहमुपविष्टस्तत्समयपूर्वकमुपगृह्यन्तां तत्रभवन्तो विटाः" इति ॥

यदाज्ञापयति भट्टिः। भो भो शृण्वन्तु शृण्वन्तु भवन्तः—

द्यूतेषु मास्म विजयिष्ट पणं कदाचित्
मातुः शृणोतु पितरं विनयेन यातु।

क्षीरं शृतं पिबतु मोदकमत्तु मोहात्
व्यूढापतिर्भवतु योऽत्र वदेदयुक्तम् ॥ ११८ ॥

अपि च

परिचरतु गुरूनपैतु गोष्ठ्या
भवतु च वृद्धसमो युवा विनीतः ।
पलितमभिसमीक्ष्य यातु शान्ति
य इदमयुक्तमुदाहरेन्निपण्णः ॥ ११९ ॥

(विवृत्यावलोक्य) एष धावाकिरनन्तकथः सहसोत्थाय मामाह्वयति । किं ब्रवीषि " तस्या एवेदमविज्ञातप्रणयाया: पातकं नात्रभवतः । श्रोतुमर्हति भवान्—

अशोकं स्पर्शेन द्रुममसमये पुष्पयति यः
स्वयं यस्मिन्कामो विततशरचापो निवसति ।
स पादो विन्यस्तः पशुशिरसि मोहादिव यया
ननु प्रायश्चित्तं चरतु सुचिरं सैव चपला" इति ॥१२०॥

सम्यग्भवानाह । तथा हि —

उपवीणित एष गर्दभः
समुपश्लोकित एष वानरः ।
पयसि श्रि (शृ) त एष माहिषे
सहकारस्य रसो निपातितः ॥ १२१ ॥

अपि त्वार्त्तानुपालानि प्रायश्चित्तानि । आर्तश्चायमुपागतस्तदनुग्रहीतुमर्हन्ति भवन्तः । तत्कनु खल्वेषां गोग्लनपा । य एष मदरभसचलितमौलिमेकहस्तेनप्रतिसमाबध्य क्षुद्रमुक्तावकीर्णमिव स्वेदबिन्दुभिर्ललाटदेशं प्रदेशिन्या परिमृज्य "श्रूयतामस्य प्रायश्चित्त" मिति मामाह्वयति । यावदुपसर्पामि । एते विटाः कश्च तावदयं विटभावद्ध-

षिताकारः प्रथमतरो विटो विटपरिषदुत्थाय प्रायश्चित्तमुपदिशतीति कुपिताः । हण्डे मल्लस्वामिन् । श्रुतम् । एवमाहुरत्र भवन्तः । किं ब्रवीषि "मातावक्त्रोच्यन्तामत्रभवन्तः ॥

तातें पञ्चत्वं पञ्चरात्रे प्रयाते
मित्रेष्वार्तेषु व्याकुले बन्धुवर्गे ।
एकं क्रोशन्तं बालमाधाय पुत्रं
दास्या सार्धं पीतवानस्मि मद्यम् ॥ १२२ ॥

कथमहमविटः " इति

एवं चेत्त्वामनुजानन्ति विटमुख्योऽपीति । आस्यताम् । किं ब्रवीषि " दीयतामस्यै प्रायश्चित्तम् " इति ॥

बाढम । भूयः श्रावयामि । तत्किंनु खल्वेष मां शैठ्यः कविरार्यरक्षितो वायुवैषम्यनिपीडिताक्षरो मामाहूय "अखलु न खल्विदं प्रायश्चित्त" मिति प्रतिषेधति । अतिश्लिष्टश्चैष धान्तः । कुतः—

विक्रीणाति हि काव्यं श्रोत्रियभवनेषु मद्यचषकेण ।
यः शिबिकुले प्रसूतो भर्तृस्थाने जरां यातः ॥ १२३ ॥

अपि च—

विक्रीणन्ति हि कवयो यत्रैवं काव्यमद्य चषकेण ।
काशिषु च कोसलेषु च गर्गेषु निषादनग[illegible] ॥ १२४ ॥

यावदेनमुपसर्पामि । सखे अदमस्मि किं ब्रवीषि—

"धृतो गण्डाभोगे कमल इव बद्धो मधुकरैः
विलासिन्या मुक्तो बकुलतरुमापुष्पयति यः ।
विलासो नेत्राणां तरुणसहकारप्रियसखः
स गण्डूषः शीधु' कथमिह शिरः प्राप्स्यति पशोः"॥ इति ।

अयमपरो भवकीर्तिर्बद्धकरः प्रायश्चित्तार्थं मामाह्वयति । अतिविटश्चैष माणवकः । कुतः—

मुण्डां वृद्धां जीर्णकाषायवस्त्रां
भिक्षाहेतोर्निर्विशङ्कं प्रविष्टाम् ।
भूमावार्तां पातयित्वा स्फुरन्तीं
योऽयं कामी कामकारं करोति ॥ १२६ ॥

यावदेनमुपसर्पामि किं ब्रवीषि । "इदमस्याः प्रायश्चित्तम्—

बध्यतां मेखलादाम्ना समाकृष्य कचग्रहैः ।
अथ तस्याः प्रसुप्तायाः पादौ संवाहयत्वयम्" ॥ इति ॥

भो एतदपि प्रतिहतम् । एष इभ्यपुत्रश्चेटपुत्रैरभ्यस्तनामा गान्धर्वसेनको हस्तमुद्यम्य मामाह्वयति । यद्येष हस्तः ॥

वाद्येषु त्रिविधेष्वनेककरणैः सञ्चारिताग्रांगुलिः
ताम्राम्भोरुहपत्रवृष्टिरिव यस्तन्त्रीषु पर्यस्यते ।
कोलं वानुगतेन येन दधता श्रोणीतटे वल्लकी-
मिभ्यान्तःपुरसुन्दरीकररुहक्षेपाः समास्वादिताः ॥

यावदेनमुपसर्पामि (उपेत्य) किं ब्रवीषि—

"जघनरथनितम्बवैजयन्ती
सुरतरणव्यतिषङ्गयोगवीणा ।
क्व च मणिरशना वराङ्गनानां
क्व च चरणावशुभस्य गर्दभस्य" । इति ॥ १२९ ॥

(परिवर्तकेन) अयमिदानीं दाक्षिणात्यः कविरार्यकः प्रायश्चित्तमुपदिशति । किं ब्रवीषि—

"विभ्रमचेष्टितेनैव दृष्टिक्षेपेण भूयसा ।
शिरःकर्णोत्पलेनास्य ताड्यतां मत्तया तया" ॥ इति ॥ १३० ॥

एतदपि प्रतिहतमनेन गान्धारकेण हस्तिमूर्खेण । किमिदमुच्यते भवता—

“नखविलिखितं कर्णे नार्यानिवेशितबन्धनं
खचितशबलं दृष्टिक्षेपैरपाङ्गविलम्बिभिः ।
यदि नरपशोरस्येदं भो शिरस्यतिपात्यते
सुरभिरजसा प्रायश्चित्तं किमस्य भविष्यति” ॥ इति ॥

बाढमेवमेतदिति प्रतिपन्ना विटमुख्याः (परिवर्तकेन) इमावपरौ मामाह्वयतः ॥

गुप्तमहेश्वरदत्तौ सुहृदावेकासनस्थितावेतौ ।
उपगतकाव्यप्रतिभौ वररुचिकाव्यानुसारेण ॥ १३२ ॥

यावदुपसर्पामि (उपसृत्य) हण्डे गुप्तरोमश किमाह भवान्—

‘पादप्रक्षाळनेनास्याः शिरः प्रक्षाल्यता’मिति ।

कथमेतदपि विप्रतिषिद्धं त्रैविद्यवृद्धैरिति सुहृद्भिरनुगृहीतनाम्ना महेश्वरदत्तेन—

पादप्रक्षाळनं तस्याः पातुमप्येष नार्हति । इति ।

अयमपरोऽस्मत्सुहृत्सौवीरको वृद्धविटः स्वच्छन्दस्मितोदग्रया वाचा मन्त्रयते । किमाह भवान्—

निर्भूषणावयवचारुतराङ्गयष्टिं
स्नानार्द्रमुक्तजघनस्थितकेशहस्ताम् ।
तामानयाम्यहमयन्तु दधातु तस्याः
नेत्रप्रभाशबलमण्डलमात्मदर्शम् ॥ इति ॥

इदमपि प्रतिषिद्धमनेन कविना दाशेरकेण रुद्रवर्मणा । किं ब्रवीषि—

“विद्वानयं महति कोकिकुले प्रसूतो
मन्त्राधिकारसचिवो नृपसत्तमस्य ।
वेश्याङ्गनाचरणपातरजोऽवधूतान्
केशान्न धारयितुमर्हति मुण्ड्यतां सः” ॥ इति ॥

एष खल्वनुगृहीतोऽस्मीत्युक्त्वा विष्णुनागो विज्ञापयति 'किं किल स-दानमिदं दासीपदन्यासमर्पितं शिरो विच्छिन्नमिच्छामि प्रागेव तु शि-रोरुहाणि' इति । कथमेतत्कृत्यस्य प्रतिहतमन्येन विटमहत्तरेण भट्टिजी-मूतेन । किमाह भवान्—

स्खलितवलयशब्दैरञ्चितभ्रूलतानां
खचितनखमयूखैरंगुलीयप्रभाभिः ।
किसलयसुकुमारैः पाणिभिः सुन्दरीणां
सुचिरमनभिमृष्टान्धारयत्वेष केशान् ॥ १३६ ॥

अपि चेदमस्याः प्रायश्चित्तं श्रूयताम्—

तस्या मदालसविघूर्णितलोचनायाः
श्रोण्यर्पितैककरसंहतमेखलायाः ।
सालक्तकेन चरणेन सनूपुरेण
पश्यत्वयं शिरसि मामनुगृह्णमाणम् ॥ इति ॥ १३७ ॥

एते विटाः साधुवादानुयात्रा एतदेव प्रायश्चित्तमिति वादिनः सम्भाव-यन्ति विटमहत्तरं भट्टिजीमूतम् । एष सर्वथानुगृहीतोऽस्मीत्युक्त्वा प्रस्थितस्तौण्डिकोकिर्विष्णुनागः । एष मामाह्वयति विटमहत्तरो भट्टी । अयमस्मि । किमाह भवान् । अनुष्ठितमिदं किं ते भूयः प्रियमुपहरा-मीति भो श्रूयताम् ॥

कुट्टिन्यश्चतुरकथा भवन्त्वरोगा
धूर्तानामधिकशताः पणा भवन्तु ।
भूयासुः प्रियविटसङ्गमाः पुरेऽस्मिन्
वारस्त्रीप्रणयमहोत्सवाः प्रदोषा ॥ १३८ ॥

(निष्क्रान्तो विटः)

इति कवेरुदीच्यस्य विश्वेश्वरदत्तपुत्रस्यार्यश्यामिलकस्य
कृतिः पादताडितकं नाम भाणः समाप्तः ॥